तेन खलु पुनः समयेन पूर्वस्यान्दिशि इतो बुद्धक्षेत्रादेकगङ्गा-नदी-वालिकासमानि बुद्धक्षेत्राण्यतिक्रम्य रत्नविचयं नाम लोकधातुस्तत्र रत्नविचये बुद्धक्षेत्रे रत्नचन्द्रो नाम तथागतोऽर्हन् सम्यक्सम्बुद्धो भगवांस्तिष्ठति यापयति अप्रमेयेभ्यो बोधिसत्त्वेभ्यः पुरस्कृतः परिवृतो धर्मं देशयति स्म । यदुत बुद्धमहायानकथा तत्र बुद्धक्षेत्रे रत्नकेतुर्नाम बोधिसत्त्वो महांश्चन्द्रकेतुश्च तौ द्वौ बोधिसत्त्वौ येन रत्नचन्द्रस्तथागतस्तेनाञ्जलिं प्रणम्य रत्नचन्द्रं तथागतमेतदवोचतां । को भदन्त भगवन् हेतुः कः प्रत्ययो महतः पृथिवीचा(चा)लस्य लोके प्रादुर्भावाय महत्याश्च पुष्पवृष्टेः प्रवर्षणतायै । रत्नचन्द्रस्तथागत आह । अस्ति कुलपुत्र पश्चिमायां दिशि इतो बुद्धक्षेत्रादेकगङ्गा-नदीवालिकासमान् बुद्धक्षेत्रानतिक्रम्य तत्र सन्धीरणो नाम लोकधातुः । तत्र सन्धीरणे बुद्धक्षेत्रे रत्नगर्भस्तथागतो यावद्बुद्धो भगवांस्तिष्ठति यापयति [illegible] दीर्घीकरोत्यनुत्तरायां सम्यक्सम्बोधौ बोधिसत्त्वविनयसन्दर्शनं प्रणिधान[illegible] पारशीमुखं सूत्रं धर्मपर्यायं भाषमाणः यत्रास्य महाकारुणिको बोधिसत्त्वो महा[illegible]पं प्रणिधानं कृतं महाकरुणा परिभाविता याश् भाषिता अनुत्तरायां सम्यक्सम्बोधौ [illegible]निर्देशं बोधिसत्त्वानां तथारूपाप्रणिधाना उद्भाविता यद्बुद्धैः प्राक्[illegible] प्रणिधानं कृतं । बुद्धक्षेत्रगुणव्यूहाश्च परिगृहीता येन च सत्त्वाश्च परिगृहीताः । [illegible] महाकरुणागमनुप्राप्तो महाबोधिसत्त्वो यः [illegible] कलियुगं बुद्धक्षेत्रं सर्वं [illegible] परिगृहीताः [illegible]

[illegible]

बुद्धक्षेत्रपरमाणुरजःसमेभ्यो दिग्भ्यो बुद्धक्षेत्रेभ्यः सन्निपतनार्थं बोधिसत्त्वानाञ्च महासत्त्वानां समाधानमुखनिर्देशचर्याधर्मपर्यायं भाषणार्थं तेन तथागतेन एवंरूपाणि प्रातिहार्याणि दर्शितानि । तौ च कुलपुत्र द्वौ बोधिसत्त्वौ रत्नचन्द्रं तथागतं परिपृच्छतेस्म । कियच्चिरोत्पादितं भदन्त भगवन्तेन महाकारुणिकेन बोधिसत्त्वेन महासत्त्वेन बोधिचित्तं। कियच्चिरं बोधिचारिकां चीर्णवान् । येन पञ्चकषाये लोके तीव्रक्लेशरजसि कलियुगे वर्त्तमाने कालः परिगृहीतं आनन्तर्यकारका यावदकुशलमूले समवधानगता दग्धसन्तानाः सत्त्वा वैनेयाः परिगृहीताः ।

रत्नचन्द्रस्तथागत आह । साम्प्रतं कुलपुत्र तेन महाकारुणिकेन प्रथमचित्तमुत्पादितं अनुत्तरायां सम्यक्सम्बोधौ गच्छत कुलपुत्र यूयं तत्सन्तीरणं बुद्धक्षेत्रं तस्य रत्नगर्भस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय । तञ्च समाधानमुखनिर्देशं चर्यावैशारद्यधर्मपर्यायं श्रोष्यथ । तञ्च महाकारुणिकं बोधिसत्त्वं महासत्त्वं मद्वचनात् पृच्छथ एवञ्च वदथ रत्नचन्द्रस्तथागतस्त्वां सत्पुरुषः पृच्छति । इदञ्च चन्द्ररोचविमलं पुष्पं प्रेषितवान् साधुकारञ्चानुप्रदत्त एवञ्च प्रथमचित्तोत्पादेन त्वं सत्पुरुष महाकारुणिकव्याहारेण दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमासु लोकधातुषु बुद्धक्षेत्राणि शब्देनापूरितानि तेन त्वया सर्वत्र महाकारुणिक नाम प्रतिलब्धं तेन त्वं सत्पुरुष साधुभूय । पश्चिमकानां महाकारुणिकानां बोधिसत्त्वानां महासत्त्वानां महाकरुणाव्याहारेण प्रणिधानेनौध्वजमुच्छ्रेयथं । न त्वं सत्पुरुष भूयो बुद्धक्षेत्रपरमाणुरजःसमानागतानसंख्येयान् कल्पान् बुद्धक्षेत्रपरमाणुरजःसमान्दशदिशो यशःकीर्तिशब्देनापूरय येन त्वया बह्वसंख्येयसत्त्वकोटीशतसहस्राण्यनुत्तरायां सम्यक्सम्बोधौ समादापितानि निवेशितानि प्रतिष्ठापितानि भगवतःसकाशमुपनीतानि । अवैवर्त्तिकानि स्थापितान्यनुत्तरायां सम्यक्सम्बोधौ भविष्यन्ति येचित्तव० प्रणिधानेन बुद्धक्षेत्रगुणव्यूहा परिग्रहीष्यन्ति । ये पश्चाद्व्याकरणं लप्स्यन्ते ये त्वया बोधौ समादापिताः सर्वे ते पश्चाद्यावद्बुद्धक्षेत्रपरमाणुरजःसमासंख्येयकल्पैर्दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजस्समेषु अन्येषु लोकधातुषु ते बुद्धत्वं प्राप्य धर्मचक्रं प्रवर्त्तयित्वा आरभ्य वर्णं भाषिष्यन्ते । अनेन तृतीयेन कारणेन त्वं साधुसत्पुरुष । तेन खलु पुनः समयेन द्वानवतिः बोधिसत्त्वकोट्य एककण्ठेन वदन्ति । वयमपि भदन्त भगवं सन्तीरणं बुद्धक्षेत्रं गच्छेमः तस्य रत्नगर्भस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्यान्तिकं दर्शनाय वन्दनाय पर्युपासनाय तञ्च सत्पुरुषं दर्शनाय वन्दनाय यश्च तथागतेन त्रिभिरङ्गैस्साधुकारः प्रेषित इमं च चन्द्ररोचविमलं पुष्पं प्रेषितं । स च कुलपुत्र रत्नचन्द्रस्तथागत आह । गच्छत कुलपुत्रा यस्येदानीं कालं मन्यध्वे । तत्र च रत्नगर्भस्य तथागतस्य सकाशात् समाधानमुखनिर्देशं चर्यावैशारद्यधर्मपर्यायं श्रोष्यध्वे ।

अथ तौ द्वौ कुलपुत्रौ रत्नकेतुश्चन्द्रकेतुश्च रत्नचन्द्रस्य तथागतस्य सकाशाच्चन्द्ररोचविमलं पुष्पं गृहीत्वा सार्द्धं द्वानवतिभिर्बोधिसत्त्वकोटिभीरत्नविषयायां लोकधातौ संप्रस्थितौ । तस्यापि नाम विश्रुता एवमेव ततो बोधिसत्त्वपर्षद्वे विचये बुद्धक्षेत्रेऽन्तर्हितौ । इह सन्तीरणे बुद्धक्षेत्रे जम्बूवनोद्याने रत्नोद्याने स्थितौ येन रत्नगर्भस्तथागतस्तेनोपसंक्रान्तावुपेत्य रत्नगर्भस्य तथागतस्य पादौ शिरसा वन्दित्वा विविधाभिर्बोधिसत्त्वविकुर्वणाभिः पूजां कृत्वा रत्नगर्भस्य तथागतस्याग्रतो व्याहरणं द्रष्टुं पञ्चविंशतिं च बोधिसत्त्वपर्षदं प्राञ्जली-

पुष्पं वर्षं भगवतः । सर्वैर्बोधिसत्त्वैरिदं च महाकरुणासमन्वागतो [illegible]
तथागतेन मे पद्मोत्तमविमला पुष्पाः क्षिप्ताः ।

अथ सो दृढो बोधिसत्त्वो भगवतः सकाशात्पर्यवसितेन [illegible] पुष्पवृष्टिं चक्रे
महापृ(था)ठीपतनं । एवं मे भगवन् रत्नपद्मेन तथागतेन पद्मोत्तमपर्णं पुष्पं क्षिप्तं ।
आपृच्छाय मे भद्रन्तः क्षिप्तः । यावद्गोमं पूर्वं वेताला [illegible] पुष्पं
दिशायां बुद्धक्षेत्रेभ्यो बोधिसत्त्वा महासत्त्वाः समागम्य बुद्धक्षेत्रं समागताः । सन्ति [illegible]-
विमलपुष्पाणि गृहीत्वा आगताः पुष्पाः क्षिप्ताः [illegible] यथा
पूर्वोक्तं एवं दक्षिणायां दिशायामितो बुद्धक्षेत्रात् गङ्गानदीवालुकासमबुद्धक्षेत्रकोटीनयुतशत-
सहस्राण्यतिक्रम्य तत्र निर्धूतविरजस्थितो नाम लोकधातुस्तत्र [illegible]-
राजा नाम तथागतोऽर्हन् सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति बहूनां बोधिसत्त्वानां
महासत्त्वानां बुद्धां महायानकथां धर्मं देशयति स्म । तस्मिन् पर्षदि दृढो बोधिसत्त्वो
महासत्त्वो एको ज्ञानवलकेतुर्नाम द्वितीयः सिंहकर्णकेतुर्नो दृढो बोधिसत्त्वो महासत्त्वो
सिंहविक्रमितेश्वरराजं तथागतं परिपृच्छतः स्म को भदन्त भगवन्हेतुः कः प्रत्ययो
यत्ततः पृथिवीचा(पा)लश्च लोके प्रादुर्भावाय महतः पुष्पवर्षस्य यावद्यथा पूर्वोक्तं
येषां यावदप्रमेया दक्षिणस्यां दिग्वर्त्तिभ्यो बुद्धक्षेत्रेभ्योऽप्रमेया संख्येया बोधिसत्त्वकोटी-
नयुतशतसहस्राः सर्वोत्तमं बुद्धक्षेत्रमनुप्राप्ता यावद्यथा पूर्वोक्तं । तेन खलु पुनः समयेन
पश्चिमायान्दिशितो बुद्धक्षेत्रकोटीनयुतशतसहस्रबुद्धक्षेत्राण्यतिक्रम्य तत्र [illegible] नाम
बुद्धक्षेत्रं तत्र जितेन्द्रियविशालनेत्रो नाम तथागतस्तिष्ठति यापयति । बहूनां धर्मकामि-
भिर्धर्मं देशयति स्म तत्र [illegible] नाम बोधिसत्त्वो महासत्त्वः सिंहविक्रमिता-
क्षायक । नाम द्वितीयो बोधिसत्त्वश्चैव दृढो भद्रवर्यो जितेन्द्रियविशालनेत्रं तथागतमिममर्थं
परिपृच्छतः कुतोऽयं महापृथिवीचा(पा)लप्रादुर्भावो महतः पुष्पवृष्टिप्रवर्षस्य यावद्यथा
पूर्वोक्तं । तेन खलु पुनः समयेनोत्तरस्यान्दिशितो बुद्धक्षेत्रात् कोटीनयुतशतसहस्राण्यति-
क्रम्य तत्र जम्बुनाम लोकधातुस्तत्र लोकेश्वरराजो नाम तथागतो यापयति । भगवान् बहूनां
महायानसम्प्रस्थितानां बोधिसत्त्वानां बुद्धां महायानकथां धर्मं देशयति स्म । तत्र दृढो बो-
धिसत्त्वो एकोऽचलप्रज्ञाधरो नाम द्वितीयः [illegible] नाम सो लोकेश्वरराजं तथागतं परिपृ-
च्छतः स्म को भदन्त भगवन् हेतुः कः प्रत्ययो यत्ततः पृथिवीचा(पा)लश्च लोके प्रादुर्भावाय महा-
तश्च पुष्पवृष्टिवर्षस्य यावद्यथा पूर्वोक्तं । तेन खलु पुनः समयेनाधस्ताद्दिशितो बुद्धक्षेत्रकोटीनयुतशत-
बुद्धक्षेत्राण्युत्तानतिक्रम्य तत्र [illegible] नाम लोकधातुः तत्र [illegible]-
घोषो नाम तथागतस्तिष्ठति यापयति । बहूनां धर्मकामिभिर्धर्मं देशयति स्म । तत्र
बुद्धक्षेत्रे दृढो बोधिसत्त्वो महासत्त्वो [illegible] नाम द्वितीयः [illegible] नाम यावद्य-
थापूर्वोक्तं । तेन खलु पुनः समयेनोर्ध्वायां दिशितो बुद्धक्षेत्रात् [illegible] बुद्धक्षेत्रा-
ण्यतिक्रम्य तत्र [illegible] नाम लोकधातुस्तत्र [illegible] बुद्धक्षेत्रे [illegible]-
[illegible] नाम तथागतो [illegible] तिष्ठति यापयति बहूनां धर्मकामिभिर्धर्मं
देशयति स्म । तत्र बुद्धक्षेत्रे दृढो बोधिसत्त्वो महासत्त्वो [illegible]

विषयो नाम द्वितीयोधारणीसम्प्रहर्षणविकोपितो नाम बोधिसत्त्वस्तौ द्वौ सत्पुरुषौ प्रस्फुलितवैरोचनकुसुमं तथागतं पृष्टवन्तौ। को भदन्त भगवन् हेतुः कः प्रत्ययो महतः पृथिवीचा(पा)लस्य लोके प्रादुर्भावाय महत्याश्च पुष्पवृष्टेः।

प्रस्फुलितवैरोचनस्तथागत आह।

अस्ति कुलपुत्राधोदिशितो बुद्धक्षेत्रात्। द्वे शतसहस्रे बुद्धक्षेत्राणामतिक्रम्य। तत्र सन्तीरणो नाम लोकस्तत्र रत्नगर्भो नाम तथागतो यावद्बुद्धो भगवांस्तिष्ठति धर्मं च देशयति स्म। बहुसत्त्वकोट्यव्याकरोत्यनुत्तरायां सम्यक्सम्बोधौ बोधिसत्त्वविषयक्षेत्रसन्दर्शनप्रणिधानविषयव्यूहसमाधिविषयधारणीमुखनिर्यूहं धर्मपर्यायं भाषमाण एकैश्च तत्र महाकारुणिको बोधिसत्त्वो महासत्त्वः स एवंरूपं प्रणिधानं कृतवान् महाकरुणापरिभाविता वाचा भाषिता अनुत्तरायां सम्यक्सम्बोधौ व्याकरणनिर्देशं बोधिसत्त्वानां महासत्त्वानां यथारूपेण प्रणिधानेन उद्भाविता यथा बहुबोधिसत्त्वकोटिभिर्बुद्धक्षेत्रप्रणिधानंकृतं बुद्धक्षेत्रभूता वैनेयसत्त्वाश्च परिगृहीताः स चैको महाकरुणासमन्वागतो बोधिसत्त्वः सर्वावर्ती पर्षदमभिभूय क्लिष्टं पञ्चकषायं क्लेशावर्त्तिकनिपुणं बुद्धक्षेत्रं परिगृहीतं सर्वं चानन्तर्यकारका यावदकुशलसमवधानगता दग्धसन्ताना वैनेयाः परिगृहीताः सर्वावतीरमाणवीसदेवगन्धर्वासुरमानुषश्च लोको रत्नगर्भस्य तथागतस्य पूजामपहाय तस्य महाकारुणिकस्य पूजाकर्मणे उद्युक्ताः पञ्चमण्डलेन वन्दित्वा प्राञ्जलिभूताः स्थित्वा वर्षं भाषन्ते स्म। स च महासत्त्वो रत्नगर्भस्य तथागतस्य पुरतो निषण्णो व्याकरणं शृण्वानः। यदा च तेन महासत्त्वेन तस्य भगवतः पुरतो दक्षिणं जानुमण्डलं पृथिव्यां निहितं तदा तेन भगवता तथारूपं स्मितं प्रादुष्कृतं। यदा दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवीषड्विकारं चलिता प्रचलिता सम्प्रचलिता कंपिता यावत्पुष्पवृष्टिः प्रवर्षिता सर्वेभ्यश्च तेभ्यो बुद्धक्षेत्रेभ्यो बोधिसत्त्वा महासत्त्वाः प्रबोधनार्थं महाकरुणा बोधिसत्त्वचर्यानिदर्शनार्थं बोधिसत्त्वा महासत्त्वा बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवीषड्विकारचलिता प्रचलिता सम्प्रचलि(ता)भ्यो लोकधातुभ्यो दशभ्यो दिग्भ्यस्तत्र बुद्धक्षेत्रे सन्निपतनार्थं बोधिसत्त्वानाञ्च महासत्त्वानां समाधानमुखनिर्देशचर्याविशारदं धर्मपर्यायं भाषमाणैः तेन तथागतेनैवं रूपाणि प्रातिहार्याणि दर्शितानि तौ च कुलपुत्र द्वौ बोधिसत्त्वौ महासत्त्वौ [illegible] [illegible] सं प्रस्फुलितकुसुमवैरोचनतथागतं परिपृच्छतः [illegible] महाकारुणिकेन महासत्त्वेन [illegible] [illegible] महाकारुणिको बोधिसत्त्वो महासत्त्वो [illegible] [illegible] परिगृहीतं आनन्तर्यकारका यावदकुशल[illegible] [illegible] परिगृहीताः।

प्रस्फुलितकुसुमवैरोचनस्तथागत आह।

[illegible]

तस्य महाकारुणिकं बोधिसत्त्वं महासत्त्वं मम वचनेन पृच्छस्व एवं च वक्तव्यः प्रफुल्लितवैरोचनकुसुमस्तथागतस्त्वां सत्पुरुष पृच्छते चन्द्ररोचविमलं पुष्पं प्रेषितं साधुकारश्चानुप्रदत्तः । एवं च त्वया सत्पुरुष प्रथमचित्तोत्पादेन महाकरुणाव्याहारेण दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमा लोकधातवः शब्देनापूरिताः महाकरुणाशब्दश्च प्रतिलब्धस्तेन त्वं सत्पुरुष साधुभूयः । पश्चिमकानां महाकरुणामहायानसम्प्रस्थितानां बोधिसत्त्वानां महासत्त्वानां महाकरुणाव्याहारेण प्रणिधानेनेत्रीध्वजामुद्योपवर्णितेन त्वं सत्पुरुष साधुभूयस्त्वं सत्पुरुष बुद्धक्षेत्रपरमाणुरजःसमानागता असङ्ख्येयकल्पबुद्धक्षेत्रपरमाणुरजःसमा दशदिशि लोकधातवो यशःकीर्तिशब्देनापूरितास्तेन त्वं सत्पुरुष बहुसङ्ख्येयसत्त्वकोटीनयुतशतसहस्रा अनुत्तरायां सम्यक्सम्बोधौ समादापिता इति येनिताः प्रतिष्ठापिता भगवतः सकाशमुपनीता अवैवर्तिकाश्च स्थापिता अनुत्तरायां सम्यक्सम्बोधौ केचिदत्रैव भगवतः सकाशे प्रणिधानबुद्धक्षेत्रगुणव्यूहाः परिगृहीताः येनैषाः सत्त्वाः अकरुणाकर्मभिराच्छादिता ये त्वयाऽनुत्तरायां सम्यक्सम्बोधौ समादापिता न चर्याकरणप्रतिलब्धं । तेऽपि यथाप्रकारं प्रतिलप्स्यन्ते । सर्वे ते यथाप्यद्बुद्धक्षेत्रपरमाणुरजःसमैरसङ्ख्येयैः कल्पैर्दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमेष्वन्येषु लोकधातुषु बुद्धत्वं प्राप्य धार्मिकं धर्मचक्रं प्रवर्तयित्वा त्वामेवारभ्य वर्णं भाषिष्यन्ति ।

अनेन पर्यायेण कारणेन सत्पुरुष साधु । तेन खलु पुनः समयेन बहुबोधिसत्त्वकोट्यः स्वकुचुर्वयमपि भदन्त भगवंस्तत्र सन्नीरणे बुद्धक्षेत्रे गच्छेम तस्य रत्नगर्भस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय तस्य सत्पुरुषं दर्शनाय वन्दनाय यस्य तथागतेन त्रिभिरस्त्रैः साधुकारोऽनुप्रेषित इमे च चन्द्ररोचविमलाः पुष्पाः प्रेषिताः । स च कुलपुत्र प्रफुल्लितकुसुमवैरोचनस्तथागत आह । गच्छत यूयं कुलपुत्रा यस्येदानीं कालं मन्यध्वे । तत्र च यूयं कुलपुत्रा रत्नगर्भस्य तथागतस्य सकाशात् समवधानमुखनिर्देशचर्याविशारदं धर्मपर्यायं श्रोष्यथ ॥

अथ खलु कुलपुत्र ते द्वौ बोधिसत्त्वौ क्षयिषयक्लोपितविषयश्च धारणीसंदर्पलाभिकौविदश्च तस्य प्रफुल्लितकुसुमवैरोचनस्य तथागतस्य सकाशाच्चन्द्ररोचविमलानि पुष्पाणि गृहीत्वा बहुबोधिसत्त्वकोटिभिः सार्द्धं वङ्गुमिताद्बुद्धक्षेत्रात् प्रस्थापिता एव बुद्धक्षेत्र एकक्षणे न सम्प्राप्ता जम्बूवनोद्याने सम्पुर्णेन च रत्नगर्भस्तथागतस्तेनोपसंक्रान्ताः । तेन खलु पुनः समयेन सर्वावन्तं सन्नीरणं बुद्धक्षेत्रं एवंरूपं परिपूर्णं महायानिकैर्बोधिसत्त्वैः सर्वकुशलमानिकैः श्रावकयानिकैः कुलपुत्रैर्देवैर्यावन्महोरगैर्मनुष्यैरपि नाम ईर्ष्यायनं वा ख्यापनं वा निक्षेपनं वा सान्तिकं वा यथातं स्फुटं भवतु । एवमेव सर्वं सन्नीरणं बुद्धक्षेत्रं परिपूर्णं स्फुटं महायानिकैः कुलपुत्रैर्वा यावन्महोरगैर्वा । अथ बोधिसत्त्वा रत्नगर्भस्य तथागतस्य पादौ शिरसा वन्दित्वा विचित्रसमाधानसमनेन बोधिसत्त्वविकुर्वितेन पूजां कृत्वा रत्नगर्भस्य तथागतस्य पुनः पादयोः दृष्ट्वा सर्वविस्मयजाताः सर्वे प्राञ्जलयः स्थिता तत्र [illegible] बोधिसत्त्वानामेतदवोचत् । अयं महाकारुणिको बोधिसत्त्वो महासत्त्वः तस्य प्रफुल्लितकुसुमवैरोचनेन तथागतेन इमे चन्द्ररोचविमलाः पुष्पाः [illegible] च [illegible] तस्य [illegible] इमे चन्द्ररोचविमलाः पुष्पाः [illegible]

विषयो नाम द्वितीयो धारणीसम्महर्षणविकोपितो नाम बोधिसत्त्वस्तौ द्वौ सत्पुरुषौ प्रस्फु-लितवैरोचनकुसुमं तथागतं पृष्टवन्तौ। को भदन्त भगवन् हेतुः कः प्रत्ययो महतः पृथिवी-वा(पा)लस्य लोके प्रादुर्भावाय महत्याश्च पुष्पवृष्टेः।

प्रस्फुलितवैरोचनस्तथागत आह।

अस्ति कुलपुत्रा घोदिशितो बुद्धक्षेत्रात्। द्वे शतसहस्रे बुद्धक्षेत्राणामतिक्राम्य। तत्र सन्तीरणो नाम लोकस्तत्र रत्नगर्भो नाम तथागतो यावद्बुद्धो भगवांस्तिष्ठति धर्मं च देश-यति स्म। बहुसत्त्वकोट्यो व्याकरोत्यनुत्तरायां सम्यक्सम्बोधौ बोधिसत्त्वविषयतेजसन्दर्शन-प्रणिधानविषयव्यूहसमाधिविषयधारणीमुखनिर्यूहं धर्मपर्यायं भाषमाण एकैश्च तत्र महाकारुणिको बोधिसत्त्वो महासत्त्वः स एवंरूपं प्रणिधानं कृतवान् महाकरुणापरि-भाविता वाचा भाषिता अनुत्तरायां सम्यक्सम्बोधौ व्याकरणनिर्देशं बोधिसत्त्वानां महा-सत्त्वानां यथारूपेण प्रणिधानेन उद्भाविता यथा बहुबोधिसत्त्वकोटिभिर्बुद्धक्षेत्रप्रणिधानं कृतं बुद्धक्षेत्रव्यूहा वैनेयसत्त्वाश्च परिगृहीताः स चैको महाकरुणासमन्वागतो बोधिसत्त्वः सर्वावतीं पर्षदमभिभूय क्लिष्टं पञ्चकषायं कलिशारणिकलियुगं बुद्धक्षेत्रं परिगृहीतं सर्वे चान-न्तर्यकारका यावदकुशलसमवधानगता दग्धसन्ताना वैनेयाः परिगृहीताः सर्वावतीरमापर्षा-सदेवगन्धर्वासुरमानुषस्य लोको रत्नगर्भस्य तथागतस्य पूजासम्पदाय तथा महाकारुणिकस्य पूजाकर्मणे उद्युक्ताः पञ्चमण्डलेन वन्दित्वा प्राञ्जलिभूताः स्थित्वा दर्शं भाषन्ते स्म। स च महासत्त्वो रत्नगर्भस्य तथागतस्य पुरतो निषण्णो व्याकरणं श्रुतवान्। यदा च तेन महा-सत्त्वेन तस्य भगवतः पुरतो दक्षिणं जानुमण्डलं पृथिव्यां निक्षिप्तं तदा तेन भगवता तथाकृतं स्मितं प्राविष्कृतं। यदा दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवी षड्विकारं चलिता प्रचलिता सम्प्रचलिता कंपिता यावत्पुष्पवृष्टिः प्रवर्षिता सर्वभश तेभ्यो बुद्धक्षेत्रेभ्यो बोधिसत्त्वा महासत्त्वाः प्रबोधनार्थं महाकरुणा बोधिसत्त्वचर्यानिदर्शनार्थं बोधिसत्त्वा महासत्त्वा बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवीषड्विकारचलिता प्रचलिता सम्प्रचलि(ता)भ्यो लोकधातुभ्यो दशभ्यो दिग्भ्यस्तत्र बुद्धक्षेत्रे सन्निपतनार्थं बोधि-सत्त्वानाञ्च महासत्त्वानां समाधानमुखनिर्देशपर्यायविशारदं धर्मपर्यायं भाषणार्थं तेन तथा-गतेनैवं रूपाणि प्रातिहार्याणि दर्शितानि तौ च कुलपुत्र द्वौ बोधिसत्त्वौ महासत्त्वौ [illegible] [illegible] धारणीसंहर्षणविकोपितश्च सं प्रस्फुलितकुसुमवैरोचनतथागतं परि-पृष्टवन्तः [illegible] भदन्त भगवन् महाकारुणिकेन महासत्त्वेन [illegible] [illegible] महाकारुणिको बोधिसत्त्वो महासत्त्वो [illegible] [illegible] [illegible] [illegible] [illegible] परिगृहीताः।

[illegible] आह।

[illegible]

तद्द महाकारुणिकं बोधिसत्त्वं महासत्त्वं मम वचनेन पृच्छस्व एवं च वक्तव्यः प्रफुल्लितवैरो-
चनकुसुमतथागतस्त्वां सत्पुरुष पृच्छति चन्द्ररोचविमलं पुष्पं प्रेषितं साधुकारश्चानुप्रदत्तः ।
एवं च त्वया सत्पुरुष प्रथमचित्तोत्पादेन महाकरुणाधाहारेण दशसु दिक्षु बुद्धक्षेत्र-
परमाणुरजःसमा लोकधातवः शब्देनापूरिताः महाकरुणासन्दर्श प्रतिलम्भस्तेन त्वं सत्पुरुष
साधुभूयः । पश्चिमकानां महाकरुणामहायानसम्प्रस्थितानां बोधिसत्त्वानां महासत्त्वानां
महाकरुणाधाहारेण प्रणिधानेनेर्यापथानुच्छेयवर्षितेन त्वं सत्पुरुष साधुभूयस्त्वं सत्पुरुष बुद्ध-
क्षेत्रपरमाणुरजःसमानागता असङ्ख्येयकल्पबुद्धक्षेत्रपरमाणुरजःसमा दशदिशि लोकधातवो यशः-
कीर्त्तिशब्देनापूरितास्तेन त्वं सत्पुरुष बहुसङ्ख्येयसत्त्वकोटीनयुतशतसहस्रा अनुत्तरायां सम्यक्-
सम्बोधौ समादापितानि येनिताः प्रतिष्ठापिता भगवतः सकाशमुपनीता अवैवर्त्तिकाय
स्थापिता अनुत्तरायां सम्यक्सम्बोधौ कैश्चित्तथैव भगवतः सकाशे प्रणिधानबुद्धक्षेत्रगुणव्यूहाः
परिगृहीता वैनेयाः सत्त्वाः अकरुणाकैर्भिरुत्सृष्टा ये त्वयाऽनुत्तरायां सम्यक्सम्बोधौ
समादापिता न चर्याकरणप्रतिलब्धं । तेऽपि यथाव्याकरणं प्रतिलप्स्यन्ते । सर्वे ते यथावद्-
बुद्धक्षेत्रपरमाणुरजःसमैरसङ्ख्येयैः कल्पैर्दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमेष्वन्येषु लोकधातुषु
बुद्धत्वं प्राप्य धार्मिकैर्धर्मचक्रं प्रवर्त्तयित्वा त्वामेवारभ्य वर्णं भाषिष्यन्ति ।

अनेन तृतीयेन कारणेन सत्पुरुष साधु । तेन खलु पुनः समयेन बहुबोधिसत्त्वकोट्य एव-
मुचुर्वयमपि भदन्त भगवंस्तत्र सन्धीरणे बुद्धक्षेत्रे गच्छेम तस्य रत्नगर्भस्य तथागतस्यार्हतः
सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय तस्य सत्पुरुषं दर्शनाय वन्दनाय यस्य तथागतेन
त्रिभिरङ्गैः साधुकारोऽनुप्रेषित इमे च चन्द्ररोचविमलाः पुष्पाः प्रेषिताः । स च कुलपुत्र
प्रफुल्लितकुसुमवैरोचनतथागत आह । गच्छत यूयं कुलपुत्रा यस्येतर्हि कालं मन्यध्वे । तत्र
यूयं कुलपुत्रा रत्नगर्भस्य तथागतस्य सकाशात् समवधानमुखनिर्देशवर्यावैशारद्यं धर्मपर्यायं
श्रोष्यथ ॥

अथ खलु कुलपुत्र तौ द्वौ बोधिसत्त्वौ स्वविषयसङ्कोपितविषयस्य धारणीसंदर्शयवि-
कोपितस्य तस्य प्रफुल्लितकुसुमवैरोचनस्य तथागतस्य सकाशाच्चन्द्ररोचविमलां पुष्पां गृहीत्वा
त्वा बहुबोधिसत्त्वकोटिभिः सार्द्धं सङ्कुसुमितात्बुद्धक्षेत्राद् प्रस्थापिता इव बुद्धक्षेत्र एकक्षणे
न सम्प्राप्ता जम्बूवनोद्याने तत्पुरुषेन च रत्नगर्भस्तथागतस्तेनोपसंक्रान्तः । तेन खलु पुनः सम-
येन सर्वोऽयं, सन्धीरणं बुद्धक्षेत्रं एवंरूपं परिपूर्णं महायानिकैर्बोधिसत्त्वैः प्रत्येकबुद्धया-
निकैः श्रावकयानिकैः कुलपुत्रैर्देवैर्यावन्महोरगैरन्ततोऽपि नाम दण्डवनं वा वडवनं वा ति-
लवनं वा शालिवनं वा सम्यक् स्फुटं भवेत् । एवमेव तस्मिं समये सन्धीरणं बुद्धक्षेत्रं परि-
पूर्णं स्फुटं महायानिकैः कुलपुत्रैरेवमन्दरोरगैस्ते च बोधिसत्त्वा रत्नगर्भस्य तथागतस्य पादौ
शिरसा वन्दित्वा विविधसमाधानबलेन बोधिसत्त्वविकुर्वाणेन पूजांकृत्वा रत्नगर्भस्य तथा-
गतस्य पुरतः सान्तरं दृष्ट्वा सर्वोऽत्यद्भुताः पर्याः प्राञ्जलिभूताः स्थित्वा वर्णं भाषमाणाः तेषां
बोधिसत्त्वानामेतदभवत् । अयं महाकारुणिको बोधिसत्त्वो महासत्त्वो यस्य प्रफुल्लितकुसुम-
वैरोचनेन तथागतेन इमे चन्द्ररोचविमलाः पुष्पा विसर्जितास्ते च बोधिसत्त्वा भगवत्सकाशात्
पराङ्मुख तस्य सान्तरस्य ते चन्द्ररोचविमलाः पुष्पा दत्त्वानार्पिताहुः । इमे ते सत्पुरुष प्रफु-

विषयो नाम द्वितीयोधारणीसम्प्रहर्षणविकोपितो नाम बोधिसत्त्वस्तौ द्वौ सत्पुरुषौ प्रस्फुलितवैरोचनकुसुमं तथागतं पृच्छन्तौ। को भदन्त भगवन् हेतुः कः प्रत्ययो महतः पृथिवीचा(पा)लस्य लोके प्रादुर्भावाय महत्याश्च पुष्पवृष्टेः ।

प्रस्फुलितवैरोचनस्तथागत आह ।

अस्ति कुलपुत्राधोदिशितो बुद्धक्षेत्रात् । द्वे शतसहस्रे बुद्धक्षेत्राणामतिक्रम्य । तत्र सन्तीरणो नाम लोकस्तत्र रत्नगर्भो नाम तथागतो यावद्बुद्धो भगवांस्तिष्ठति धर्मं च देशयति स्म । बहुसत्त्वकोट्यव्याकरोत्यनुत्तरायां सम्यक्सम्बोधौ बोधिसत्त्वविषयक्षेत्रसन्दर्शनप्रणिधानविषयव्यूहसमाधिविषयधारणीमुखनिर्यूहं धर्मपर्यायं भाषमाण एकश्च तत्र महाकारुणिको बोधिसत्त्वो महासत्त्वः स एवंरूपं प्रणिधानं कृतवान् महाकरुणापरिभाविता वाचा भाषिता अनुत्तरायां सम्यक्सम्बोधौ व्याकरणनिर्देशं बोधिसत्त्वानां महासत्त्वानां यथारूपेण प्रणिधानेन उद्भाविता यथा बहुबोधिसत्त्वकोटिभिर्बुद्धक्षेत्रप्रणिधानंकृतं बुद्धक्षेत्रव्यूहा वैनेयसत्त्वाश्च परिगृहीताः स चैको महाकरुणासमन्वागतो बोधिसत्त्वः सर्वावतीं पर्षदमभिभूय क्लिष्टं पञ्चकषायं क्लेशारणिकलियुगं बुद्धक्षेत्रं परिगृहीतं सर्वं चानन्तर्यकारका यावदकुशलसमवधानगता दग्धसन्ताना वैनेयाः परिगृहीताः सर्वावतीरसापर्षासदेवगन्धर्वासुरमानुषश्च लोको रत्नगर्भस्य तथागतस्य पूजामपहाय तस्य महाकारुणिकस्य पूजाकर्मणे उद्युक्ताः पञ्चमण्डलेन वन्दित्वा प्राञ्जलिभूताः स्थित्वा वर्णं भाषन्ते स्म । स च महासत्त्वो रत्नगर्भस्य तथागतस्य पुरतो निषण्णो व्याकरणं शृण्वानः । यदा च तेन महासत्त्वेन तस्य भगवतः पुरतो दक्षिणं जानुमण्डलं पृथिव्यान्निक्षिप्तं तदा तेन भगवता तथारूपं स्मितं प्राविष्कृतं । यदा दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवीषड्विकारं चलिता प्रचलिता सम्प्रचलिता कंपिता यावत्पुष्पवृष्टिः प्रवर्षिता सर्वेभ्यश्च तेभ्यो बुद्धक्षेत्रेभ्यो बोधिसत्त्वा महासत्त्वाः प्रबोधनार्थं महाकरुणा बोधिसत्त्वचर्यानिदर्शनार्थं बोधिसत्त्वा महासत्त्वा बुद्धक्षेत्रपरमाणुरजःसमेषु लोकधातुषु महापृथिवीषड्विकारश्चलिता प्रचलिता सम्प्रचलि(ता)भ्यो लोकधातुभ्यो दशभ्यो दिग्भ्यस्तत्र बुद्धक्षेत्रे सन्निपतनार्थं बोधिसत्त्वानाञ्च महासत्त्वानां समाधानमुखनिर्देशचर्यावैशारद्यं धर्मपर्यायं भाषणार्थं तेन तथागतेनैवं रूपाणि प्रातिहार्याणि दर्शितानि तौ च कुलपुत्र द्वौ बोधिसत्त्वौ महासत्त्वौ स्वविषयसङ्कोपितविषयस्वधारणीसंहर्षणविकोपितश्च तं प्रस्फुलितकुसुमवैरोचनतथागतं परिपृच्छतः स्म कियच्चिरोत्पादितं भदन्त भगवंस्तेन महाकारुणिकेन महासत्त्वेन बोधाय चित्तं कियच्चिरं वा महाकारुणिको बोधिसत्त्वो महासत्त्वो बोधिचारिकां चीर्णो येन पञ्चकषाये लोके तीव्रक्लेशरणिमे कलियुगे वर्तमाने कालः परिगृहीत आनन्तर्यकारका यावदकुशलमूलेभसवधानगता दग्धसन्ताना वैनेयाः परिगृहीताः ।

प्रस्फुलितकुसुमवैरोचनस्तथागत आह ।

सम्प्रति कुलपुत्र तेन महाकारुणिकेन प्रथममनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितं गच्छत कुलपुत्रा यूयं सन्तीरणं लोकधातुं । तस्य रत्नगर्भस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य दर्शनाय वन्दनाय पर्युपासनाय तस्य समाधानमुखनिर्देशं चर्यावैशारद्यं धर्मपर्यायं श्रवणाय

जीवितेन्द्रियं प्रतिलभेयुः ॥ पुनश्चोत्तिष्ठेयुर्मित्रमात्योदितांश्च दृष्ट्वा ते सर्वे उद्यानं प्रविश्य पञ्चभिः कामगुणैः समर्पिताः समङ्गीभूता विहरेयुर्ये च पुनस्तेषयेयुस्तेषु द्वे ब्रह्मविहारे उपपद्येयुः ॥

ये च तत्र चिरस्थायिनो भवेयुरव्यचित्तायुष्का न च तत्र च्युत्वा अन्यत्रोपपद्येयुः । यथा ब्राह्मणाख्यं पुष्पमेवमेवमयं महायानसन्निपातो द्रष्टव्यः । यथा सूर्योद्गमनकाले प्रत्युपस्थिते ते पुष्पा विकसिता प्रफुल्लिता भवन्ति । तपन्ति विरोचन्ति । केचिद्योजनशतमुच्चत्वेन केचिद्यावदेका जनसहस्रमुच्चत्वेन बहूनां सत्त्वानां विविधरोगाः प्रशमन्ति । एवमेव सत्पुरुषा तथागतो *बुद्धसूर्यो लोक उत्पादि । यथा ते पुष्पाः सूर्योदितस्य रश्मिभिर्विकसिता । भासन्ति तपन्ति विरोचन्ति विविधरोगोपहतानां सत्त्वानां रोगोपशमो भवति । एवमेवाहं सत्पुरुष लोके उत्पन्नः सत्त्वां कारुण्यरश्मिभिः स्फारयित्वा विकासित्वा भूयः सत्त्वांस्त्रिषु पुण्यक्रियावस्तुषु नियोजयामि तथाप्यप्रमेया संख्येयाः सत्त्वा अनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिता मम च सकाशमुपनीतास्तैश्च सर्वैर्मम सकाशे स्वकस्वकानि प्रणिधानानि कृतानि बुद्धक्षेत्राणि च परिगृहीतानि । केचित्परिशुद्धा बुद्धक्षेत्रा परिगृहीताः केचिदपरिशुद्धाः तथा यथेवं मया व्याकृताः । यैः सत्पुरुषैर्मम सकाशात्परिशुद्धा बुद्धक्षेत्राः परिगृहीतास्तैः शुद्धाशयाः सुविनेया अवरोपितकुशलमूला वैनेयाः सत्त्वाः परिगृहीता न ते बोधिसत्त्वा महासत्त्वा उच्यन्ते न च तेषां महापुरुषकार्यं न च तेषां महाकरुणाचित्तचैतसिकेषु प्रवर्तते । न च ते बोधिसत्त्वाः सर्वसत्त्वानां कारुणायेव सम्यक्सम्बोधिं पर्येषन्ते । येऽपि ते परिशुद्धं बुद्धक्षेत्रं परिगृह्णन्ति उत्सृष्टकृपास्ते बोधिसत्त्वा ये श्रावकप्रत्येकबुद्धयानिकैः परिवर्जितं बुद्धक्षेत्रमभ्याकाङ्क्षन्ति । न च ते बोधिसत्त्वाः कुशलमहाशयपूता येषामेवं प्रणिधानं कृतं । यथा च मेयं श्रावक बुद्धवर्जिता । अकुशलमूलसमवधानगतिकात्पायैर्विवर्जितं नरकतिर्यग्योनियमलोकविवर्जितं बुद्धक्षेत्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयुर्ये दानसमाविष्टानां बोधिसत्त्वानां श्रावकप्रत्येकबुद्धपरिवर्जितं कृतं महायानकथां तेषां देशयेयं बोधिसत्त्वा दीर्घायुष्को भवेयं चिरस्थायी । बहूनि कल्पानि शुद्धाशयानां सुविनीतानां कुशलमूलसमवधानगतानां धर्मं देशयेयं । तेन ते बोधिसत्त्वा न कुशलमहाशयसंभूता न महासत्त्वा इत्युच्यते । [illegible]

[illegible]

कल्पैरतिक्रान्तैः प्रथमचित्तमुत्पादितमनुत्तरायां सम्यक्सम्बोधौ । रत्नगर्भस्य च तथागतस्याग्रतो बहुप्राणिकोटीनयुतान्यनुत्तरायां सम्यक्सम्बोधौ समादापितानि निवेशितानि प्रतिष्ठापितानि यथाभिप्रायं सत्वेभ्यस्तथागतस्य पुरः प्रणिधानं कृतं बुद्धक्षेत्रगुणव्यूहाः परिगृहीता परिशुद्धाः केचिदपरिशुद्धाः पञ्चकषायाः परिगृहीताः तत्र च तेन महासत्वेनाहं समादापितो निवेशितश्चानुत्तरायां सम्यक्सम्बोधौ । तत्र च मया रत्नगर्भस्य तथागतस्य पुरतोऽनुत्तरायां सम्यक्सम्बोधौ पञ्चकषाये बुद्धक्षेत्रगुणव्यूहप्रणिधानं कृतं स च ते तथागतः साधुकारमदासीत् यावदहमनुत्तरायां सम्यक्सम्बोधौ योऽस्माकं बोधाय समादापकः कल्याणमित्रो तीव्रपरुषस्त्रीप्रपञ्चकषाये कलियुगे वर्तमाने काले प्रतिक्लिष्टं बुद्धक्षेत्रं परिगृहीतं । आनन्तर्यकारका यावदकुशलमूलसमवधानगता दग्धसन्तानाः संसाराटवीकान्तारसङ्कटप्राप्ता वैनेयसत्वे प्रणिधानः परिगृहीतस्तस्य सत्पुरुषस्य दशसु दिक्ष्वसंख्येयेभ्योऽन्योन्यलोकधातुभ्यस्तिष्ठन्तो यापयन्तो बुद्धा भगवन्तः साधुकारं [illegible] प्रेषितवन्तो महाकरुणाविरोचनसौम्यो नाम कृतं । स च महाकरुणाविरोचनसौम्यो बोधिसत्वो महासत्वोऽस्माकं कल्याणमित्रो हितङ्कर एकत्त्वं चिराभिसम्बुद्धोऽङ्गुष्ठवत्यां लोकधातौ अङ्गुष्ठप्रमाणपुरुषाणां मध्ये तेषामेवाङ्गुष्ठप्रमाणानां पुरुषाणां हस्तप्रमाणेन हस्तप्रमाणकः स तथागतो दशवर्षायुष्कायां प्रजायां धार्मिकं धर्मचक्रं प्रवर्त्तितवान् तस्यापि बोधिप्राप्तस्य दशसु दिक्षु असंख्येयेभ्यो लोकधातुभ्यस्तिष्ठद्भिर्यापयद्भिस्तैस्तैर्बुद्धैर्भगवद्भिर्दूताः प्रेषिताः पूजनार्थाय ये तेन प्रथममनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिताः । ये तेन प्रथमं दानपारमितायां यावत् प्रज्ञापारमितायां समादापिता निवेशिताः प्रतिष्ठापितास्ते बुद्धैर्भगवद्भिः पूर्व्वकृतज्ञतामनुस्मरमाणैः तस्य तथागतस्य पुष्पाः प्रेषिताः यथा ब्राह्मण यथा ते बुद्धा भगवन्तः सर्वेषु बुद्धक्षेत्रेषु दीर्घेणायुषा परिशुद्धाशयानां बुद्धविहारिणां सत्वानां बुद्धकार्यं कुर्वन्ति । स च ज्योतिरसस्तथागत एवं प्रतिक्रुष्टे पञ्चकषाये बुद्धक्षेत्रे बुद्धत्वं प्राप्तवान् । आनन्तर्यकारकानां यावदकुशलमूले समवधानगतानां सत्वानामेवाल्पकेनायुषा बहूभिरेकं बुद्धकार्य्यं करोति । अनुज्झित्वा श्रावकान् प्रत्येकबुद्धांश्च धर्मं देशयति । एवमेव त्वया सत्पुरुष सर्वामिमां बोधिसत्वपर्षामभिभूय विशिष्टतरं प्रणिधानं कृतं । प्रतिक्रुष्टे बुद्धक्षेत्रे पञ्चकषाये वर्त्तमाने आनन्तर्य्यकारका यावदकुशलमूले समवधानगता वैनेयाः सत्वाः परिगृहीताः ये च ते महासत्वा यैः परिशुद्धाः नरकतिर्य्यग्योनिः परिवर्जिता श्रावकप्रत्येकबुद्धपरिवर्जिताः शुद्धाशयाः कुशलमूलाः सत्वा वैनेयाः परिगृहीता इमे सत्वाः पुष्पोपमा उच्यन्ते न ते महासत्वाः पुण्डरीकोपमा ये सुविनीतानामवरुद्धकुशलमूलानां मध्ये बुद्धकार्य्यं करिष्यन्ति । चत्वारि ब्राह्मण बोधिसत्वानां कुशीदवस्तूनि । कतमानि चत्वारि । परिशुद्धबुद्धक्षेत्रप्रणिधानं परिशुद्धाशयानां सत्वानां बुद्धकार्य्यप्रणिधानं । श्रावकप्रत्येकबुद्धयानकथा बोधिप्राप्तस्य देशनाप्रणिधानं । बोधिप्राप्तस्य दीर्घायुष्कताप्रणिधानञ्च इमानि चत्वारि बोधिसत्वानां कुशीदवस्तूनि । येन बोधिसत्वाः पुष्पोपमा इत्युच्यन्ते न पुण्डरीकोपमा न महासत्वा इत्युच्यन्ते । तद्यथापि नाम ब्राह्मण इमान् महाबोधिसत्वपर्षां स्थापयित्वा वायुविष्णुना येनापरिशुद्धं

बुद्धक्षेत्रं परिगृहीतं क्लेशाकुलाः सत्त्वा वैनेयाः परिगृहीता यथोक्ता भद्रकल्पिकाः बुद्धाः । चत्वारीमानि बोधिसत्त्वानां महासत्त्वानामाश्चर्याद्भुतानि वस्तूनि चत्वारि । अपरिशुद्ध- क्षेत्रप्रणिधानं । अपरिशुद्धाशयानां सत्त्वानां बुद्धकार्यप्रणिधानं । बोधिप्राप्तस्य श्रावक- प्रत्येकबुद्धयानकथादेशनप्रणिधानं । मध्यमया प्रतिपदा बोधिप्राप्तस्य नातिदीर्घं नात्या- युष्कता प्रणिधानं । इमानि चत्वारि बोधिसत्त्वानां महासत्त्वानामाश्चर्याद्भुतानि । इम[illegible] ते बोधिसत्त्वाः पुण्डरीकोपमा उच्यन्ते न पुष्पोपमास्ते बोधिसत्त्वा महासत्त्वा उच्यन्ते । तत्रापि त्वं ब्राह्मणेन्द्राद्य अप्रमेयानामसंख्येयानां बोधिसत्त्वानां मध्ये [illegible] तथागतैर्भगवद्भिः करुणापुण्डरीकसूत्रैः प्रणिधानविशेषेण । यतस्त्वया [illegible] यावदनुत्तरसम्यक्संबोधिमनुप्राप्ता वैनेयाः परिगृहीतास्ततस्त्वं [illegible] महाकारुणिकाधारेण त्वं [illegible] बुद्धक्षेत्र[illegible] कारी [illegible] महाकारुणिकस्ते नाम [illegible] उच्यते । भविष्यसि त्वं महाकारुणिकानामग्र[illegible] [illegible] [illegible] कल्पे [illegible] बुद्धक्षेत्रे [illegible] [illegible] महासत्त्व[illegible] [illegible] [illegible] लोके तथागतो भविष्यसि विद्याचरणसंपन्नो [illegible] [illegible] [illegible] [illegible] भविष्यति । [illegible] [illegible] [illegible] [illegible] यदा [illegible] [illegible] [illegible] भविष्यति । [illegible] [illegible] [illegible] [illegible] बुद्धानां ।

[illegible]

कल्पैरतिक्रान्तैः प्रथमचित्तमुत्पादितमनुत्तरायां सम्यक्सम्बोधौ। रत्नगर्भात्पुनस्तथा-
गतस्याग्रतो बहुप्राणिकोटीनयुतान्यनुत्तरायां सम्यक्सम्बोधौ समादापितानि निवे-
शितानि प्रतिष्ठापितानि यथाभिप्रायं सत्वैस्तस्य तथागतस्य पुरः प्रणिधानं कृतं बुद्धक्षेत्रगुण-
व्यूहाः परिगृहीता परिशुद्धाः केचिदपरिशुद्धाः पञ्चकषायाः परिगृहीताः तत्र च तेन महा-
सत्वेनाहं समादापितो निवेशितश्चानुत्तरायां सम्यक्सम्बोधौ। तत्र च मया रत्नगर्भस्यान्ति-
कभासस्य तथागतस्य पुरतोऽनुत्तरायां सम्यक्सम्बोधौ पञ्चकषाये बुद्धक्षेत्रगुणव्यूहप्रणिधानं
कृतं स च ते तथागतः साधुकारमदासीत् आकृतवाहमनुत्तरायां सम्यक्सम्बोधौ योऽस्म-
स्माकं बोधाय समादापकः कल्याणमित्रो तीव्रमत्सुरप्रसवीपञ्चकषाये कलियुगे वर्तमाने त्वं
प्रतिक्लिष्टं बुद्धक्षेत्रं परिगृहीतं। आनन्तर्यकारका यावदकुशलमूलसमवधानगता [illegible]
संसाराटवीकान्तारसङ्कटप्राप्ता वैनेयसत्वे प्रणिधानैः परिगृहीतस्तस्य सत्पुरुषस्य दशसु दि-
प्रमेयासङ्ख्येभ्योऽन्योन्यलोकधातुभ्यः क्षिपन्तो यापयन्तो बुद्धा भगवन्तः साधुकारं प्रदत्तवन्तः
प्रेषितवन्तो महाकरुणाविरोचनसोम्यो नाम कृतं। स च महाकरुणाविरोचनसोम्यो बोधि-
सत्वो महासत्वोऽस्माकं कल्याणमित्रो हितकर एकस्त्वं चिराभिसम्बुद्धोऽङ्गुष्ठवत्यां लोकधातौ
अङ्गुष्ठप्रमाणपुरुषाणां मध्ये तेषामेवाङ्गुष्ठप्रमाणानां पुरुषाणां हस्तप्रमाणेन हस्तप्रमाणकः
स तथागतो दशवर्षायुष्कायां प्रजायां धार्मिकं धर्मचक्रं प्रवर्तितवान् तस्यापि बोधिप्राप्तस्य
दशसु दिक्षु प्रमेयासङ्ख्येभ्यो लोकधातुभ्यस्तिष्ठद्भिर्यापयद्भिस्तैस्तैर्बुद्धैर्भगवद्भिर्दूताः प्रेषिताः
पूजनार्थाय ये तेन प्रथममनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिताः।
ये तेन प्रथमं दानपारमितायां यावत् प्रज्ञापारमितायां समादापिता निवेशिताः प्रतिष्ठा-
पितास्ते बुद्धैर्भगवद्भिः पूर्वकृतज्ञतामनुस्मरमाणैः तस्य तथागतस्य पुष्पाः प्रेषिताः
यस्य ब्राह्मण यथा ते बुद्धा भगवन्तः सर्वेषु बुद्धक्षेत्रेषु दीर्घायुषा परिशुद्धाशयानां सुख-
विहारिणां सत्वानां बुद्धकार्यं कुर्वन्ति। स च ज्योतिरसस्तथागत एवं प्रतिक्रुष्टः पञ्चकषाये
बुद्धक्षेत्रे बुद्धत्वं प्राप्तवान्। आनन्तर्यकारकानां यावदकुशलमूले समवधानगतानां सत्वानामे-
वाल्पकेनायुषा बहुभिरेकं बुद्धकार्यं करोति। अनुज्झिता श्रावकाः प्रत्येकबुद्धाश्च धर्मं देश-
यति। एवमेव त्वया सत्पुरुष सर्वामिमां बोधिसत्वपर्षामभिभूय विशिष्टतरं प्रणिधानं
कृतं। प्रतिक्रुष्टे बुद्धक्षेत्रे पञ्चकषाये वर्तमाने आनन्तर्यकारका यावदकुशलमूले समवधान-
गता वैनेयाः सत्वाः परिगृहीताः ये च ते महासत्वा यैः परिशुद्धाः बुद्धक्षेत्राः परिगृहीता
नरकतिर्यग्योनिः परिवर्जिता श्रावकप्रत्येकबुद्धपरिवर्जिताः शुद्धाशयाः सुविनीता अवरुप्त-
कुशलमूलाः सत्वा वैनेयाः परिगृहीता इमे सत्वाः पुष्पोपमा उच्यन्ते न ते महासत्वाः पुण्ड-
रीकोपमा ये सुविनीतानामवरुप्तकुशलमूलानां मध्ये बुद्धकार्यं करिष्यन्ति। चत्वारि ब्राह्मण
बोधिसत्वानां कुसीदवस्तूनि। कतमानि चत्वारि। परिशुद्धबुद्धक्षेत्रप्रणिधानं परिशुद्धा-
शयानां सत्वानां बुद्धकार्यप्रणिधानं। श्रावकप्रत्येकबुद्धयानकथा बोधिप्राप्तस्य देशनाप्रणि-
धानं। बोधिप्राप्तस्य दीर्घायुष्कताप्रणिधानं। इमानि चत्वारि बोधिसत्वानां कुसीद-
वस्तूनि। येन बोधिसत्वाः पुष्पोपमा इत्युच्यन्ते न पुण्डरीकोपमा न महासत्वा इत्युच्यन्ते।
तद्यथापि नाम ब्राह्मण इमान् सदा बोधिसत्वपर्षां स्थापयित्वा वायुविष्णुना येनापरिशुद्धं

बुद्धक्षेत्रं परिगृहीतं क्लेशाकुलाः सत्त्वा वैनेयाः परिगृहीता यथैष्यो भद्रकल्पिकाः कुलपुत्राः । चत्वारीमानि बोधिसत्त्वानां महासत्त्वानामाश्चर्यवीर्यवस्तूनि कतमानि चत्वारि । अपरिशुद्धक्षेत्रप्रणिधानं । अपरिशुद्धाशयानां सत्त्वानां बुद्धकार्यप्रणिधानं । बोधिप्राप्तस्य श्रावकप्रत्येकबुद्धयानकथादेशनप्रणिधानं । मध्यमया प्रतिपदा बोधिप्राप्तस्य नातिदीर्घेना नाल्पायुष्कता प्रणिधानं । इमानि चत्वारि बोधिसत्त्वानां महासत्त्वानामाश्चर्यवीर्यवस्तूनि । येन ते बोधिसत्त्वाः पुण्डरीकोपमा उच्यन्ते न पुष्पोपमास्ते बोधिसत्त्वा महासत्त्वा उच्यन्ते । तत्रापि त्वं ब्राह्मणेन्द्र अप्रमेयानामसंख्येयानां बोधिसत्त्वानां मध्ये कुशलव्याकरणैश्च तथागताभिमुखः करुणापुण्डरीकसूत्रस्तैः प्रणिधानविशेषेण । यदा त्वया आनन्तर्यकारका यावदकुशलमूलसमवधानगता वैनेयाः परिगृहीतास्तेषां पञ्चकषाये बुद्धक्षेत्रं परिगृहीतं महाकरुणाधारहारेण त्वं सत्पुरुष दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमैर्बुद्धैर्भगवद्भिः साधुकारो दत्तो कृतश्च प्रेषिता महाकारुणिकश्च ते नाम कृतं सर्वा चेयं पर्षत्त्वयैव पूजाकर्मणे उद्युक्ता । भविष्यसि त्वं महाकारुणिकानागतेऽध्वन्यतिक्रान्तानेकगङ्गानदीवालिकासमानामसंख्येयानां परीत्ताविष्टे द्वितीये गङ्गानदीवालिकासमे संख्येये तस्मिन्नेव सहे बुद्धक्षेत्रे भद्रके कल्पे विंशतिवर्षशतायुष्कायां प्रजायां जरामरणाद्यधिपे बुद्धक्षेत्रेऽन्धीभूतेऽनायकेऽकुशलमूलसमवधानगते कुमार्गे विलग्नमानानां महासङ्कटप्राप्तानां सत्त्वानामानन्तर्यकारकाणामार्यापवादकानां सद्धर्मप्रतिक्षेपकाणां कुलापचितमसमापन्नानां यावद्व्यापन्नानां । शाक्यमुनिर्नाम तथागतो भविष्यसि विद्याचरणसम्पन्नो यावद्बुद्धो भगवान् विवर्त्तितलाञ्छनः प्रवर्तितधर्मचक्रः विवर्तितसर्वशत्रुक्लेशभारस्य अनन्तापर्यन्तापारस्य दिश बुद्धक्षेत्राणि शब्देनापूरयित्वा महाश्रावकसङ्घनिपातश्च ते भविष्यति । पञ्चाशद्वर्षाणि (?) [illegible] । तत्र पूर्वेण चतुश्चत्वारिंशतिवर्षपर्यन्तं सकलं बुद्धकार्यं परिपूरयिष्यसि । यथा प्रणिधान कृतं यथा रत्नगर्भस्तोऽयं राजा [illegible] बुद्धकार्यं करिष्यसि । एवमेव त्वं महाकारुणिक तत्र सहे बुद्धक्षेत्रे [illegible] प्रजायां चतुश्चत्वारिंशतिवर्षपर्यन्तं सकलं महाबुद्धकार्यं करिष्यसि [illegible] तथागतो भविष्यसि । परिनिर्वृतस्य च ते [illegible] । [illegible] बुद्धकार्यं करिष्यति । यथा त्वया प्रणिधानं कृतं [illegible] पूजितं ।

[illegible]

मां कुर्य्या अनुत्तरायां सम्यक्सम्बोधौ। स नेमी नाम शक्रः अपरस्तु पारचिन्तीनामशक्रः ते उभेऽप्याहतुः। वयमपि भो महाकारुणिक तेषु तेषु यावद्बोधिप्राप्तस्य च ते अग्रं श्रावकयुगप्रज्ञावन्तो ऋद्धिमन्तश्च भवेमः। अपरश्चारित्रचरणसुदर्शपूयिको नाम शक्रः स एवमाह। अहं ते महाकारुणिक तेषु तेषु यावच्चरमभविकस्य पुत्रो भवेयं। अपरा शिखरदेवता सौरभ्या किंशुका नाम साप्याह। अहं ते महाकारुणिक तासु तासु जातिषु भार्य्या भवेयं। बोधिप्राप्तस्य त्वं सत्पुरुष मां व्याकुर्य्या अनुत्तरायां सम्यक्सम्बोधौ कटुचरोनामा सुरेन्द्रः सोऽप्याह। अहं ते महाकारुणिक तेषु तेष्वप्रमेयासंख्येयेषु कल्पेषु सत्पुरुष बोधिचारिकाञ्चरमाणस्याह। सूपकारणमैव्यानुकूलः सहायो दासत्वेनोपस्थितेयञ्चरमभविकस्याह। ते उपस्थायको भवेयं बोधिप्राप्तस्य च ते सत्पुरुष धार्मिकं धर्मचक्रं प्रवर्तनेऽध्येषेयं अहञ्च ते धर्म्मदेशनां प्रथमां सफलां कुर्यां धर्मरसञ्च पिबेयममृतं बोधिं गच्छेयं। यावत्सर्वक्लेशप्रहाणादर्हत्त्वं प्राप्नुयां। पेयालं गङ्गानदीवालिकासमाश्च तत्र देवनागासुरमहाकारुणिकस्यानुप्रवृत्तिचर्याय प्रणिधानङ्कृतवन्तो वैनेयमुपन्यस्ता एकश्च तत्र संज्ञाविकरणभीष्मोनामा जीविकः स आह॥ अहन्ते भो ब्राह्मण बहुप्रकरणसहायको भविष्यामि। नित्यमहन्तेऽप्रमेयेषु कल्पेषु स फलचारिकोपजीवी घातिको भवेयं। नित्यञ्च त्वत्सकाशमुपसङ्क्रमेयं वस्तुयाचनार्थं शय्यासनवाहनहस्त्यश्वरथग्रामनिगमनगरपुरपुत्रदुहितरमांसरुधिरचर्म्मास्थिहस्तपादजिह्वाकर्णनासनयनशीर्षाणि च याचेयं। एवंरूपो हन्त महाब्राह्मण दानपारमितासहायको भवेयं यावत्प्रज्ञापारमितासहायको भवेयं। एवंरूपोऽहं महाब्राह्मण बोधिचारिकाञ्चरमाणस्य तव षट्सु पारमितासु सहायको भवेयं। यावत्त्वं बोधिं प्राप्नुया अहञ्च ते श्रावकस्थानमासादयेयं अशीतिधर्मस्कन्धसहस्राण्युद्गृह्णीयां स्पृष्ट्वा धर्म्मदेशको भवेयं। त्वञ्च मां व्याकुर्या अनुत्तरायां सम्यक्सम्बोन्धौ। श्रुत्वा च कुलपुत्र महाकारुणिको ब्राह्मणो रत्नगर्भस्य तथागतस्य पद्ममण्डलेन पादौ शिरसा वन्दित्वा तं संज्ञावतारभीष्याजीविकं शब्दापयित्वाह। साधु साधु सत्पुरुष यत्त्वं मम सहायको भविष्यसि। अनुत्तरचर्याया यावच्च त्वं ममाप्रमेयासङ्ख्येयजन्मान्तरनयुतसहस्रेषूपसंक्रमेर्वस्तुयाचनार्थाय। तदाहं प्रसन्नचित्तो दद्यां करन्त-पुण्यभागी भवेः। भूयश्च कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वो रत्नगर्भस्य तथागतस्य पुरत आह। स चेन्मे भदन्त भगवंस्तेषु तेष्वप्रमेयेष्वसङ्ख्येयेषु कल्पकोटीनयुतशतसहस्रेषु अनुत्तरायां सम्यक्सम्बोन्धौ चारिकाञ्चरमाणस्य ये मम पुरतो याचनकाः स्थित्वाऽन्नं याचन्ति मृदुवचनेन वा परुषवचनेन वा उल्लङ्घनवचनेन वा शठवचनेन वा याचेयुः स चेदहं भदन्त भगवन् याचनकक्षान्तिवो एकचित्तक्षणमपि रोषमुत्पादयेयं। अप्रसादं वोत्पादयेयं। दानस्य वा फलविपाकं काङ्क्षमाणो दानन्दद्याम्विसम्वादिता मे भवेयुः। ये प्रमेयासङ्ख्येयेषु दशसु दिक्षु अन्येषु लोकधातुषु बुद्धा भगवन्तस्तिष्ठन्ति ध्रियन्ति यापयन्ति धर्मञ्च देशयन्ति माचाहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं। स चेदहं भदन्त भगवन्नावन्नैकस्याप्रसन्नचित्तो दानन्दद्यान्तदपि दानप्रतिग्राहकस्य श्रद्धादेशयविनिपातनं। मा कुशलैर्धर्मैरन्तरायकरम्भवेत्। अन्तशो वालाग्रकोटीप्रमाणमात्रमपि विसम्वादिता मे बुद्धा भगवन्तो भवेयुः यदिदम्मति आह कस्य वालाग्रकोटिप्रमाणमपि। कुशलेषु धर्मेष्वन्तरायं कुर्युः अप्रम-

पर्य्यन्तिपरायणो भवेयं । यथान्नस्य तथा वस्त्रस्य । यावद्ये याचनकाः शीर्षं याचेयुः । मृदुवचनेन वा परुषवचनेन वा उल्लुण्ठवचनेन वा स्पष्टवचनेन वा शीर्षं याचेरन् । स चेदहं भदन्त भगवन् याचनकस्यान्तिके एकचित्तक्षणमपि रोषमुत्पादयेयं । अप्रसादचित्तमुत्पादयेयं दानफलविपाकमाकाङ्क्षन् शीर्षं परित्यजेयं । विसम्वादिता मे बुद्धा भगवन्तो भवेयुः । यावदहमपरिनिर्वृतिपरायणो भवेयं । यथा दानमेवं शीलं यावत्प्रज्ञापरित्यागो वाच्यः । स च कुलपुत्र रत्नगर्भस्तथागतो महाकारुणिकस्य बोधिसत्त्वस्य महासत्त्वस्य साधुकारमदासीत् साधु साधु सत्पुरुष महाकरुणाप्रतिष्ठितेन मनसा त्वया सत्पुरुषेमं प्रणिधानं कृतं । सा च कुलपुत्र सर्व्वावती स सदेवगन्धर्व्वमानुषासुरश्च लोकः प्राञ्जलीभूतः स्थित्वा साधुकारं मादासीत् साधु साधु सत्पुरुष महाकरुणाप्रतिष्ठितेन मनसा त्वया सत्पुरुष प्रणिधानं त्वमपि सत्त्वां षट्पारमिताधर्म्मैः सन्तर्पयिष्यसि । स च कुलपुत्र यथा संसारविकारभीष्माजीविको बोधिसत्त्वो दानप्रतिग्राहिकया प्रणिधानं कृतवान् एवमेव चतुरशीतिभिः प्राणिसहस्रैः प्रणिधानं कृतं । स च कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वस्तान्येवंरूपाणि प्रणिधानानि चतुरशीतानां प्राणिसहस्राणां सकाशाच्छ्रुत्वा संसारविकारभीष्मेण प्रणिधानं कृतम् ।

अथ महाकारुणिकः परमप्रीतिसौमनस्यजातः प्राञ्जलीभूतः स्थित्वा सर्व्वावतीं पर्षां व्यवलोक्य परमप्रीतमना आह । अहो आश्चर्यं भविष्याम्यहं धर्म्मदुर्भिक्षक्षीणकाले महाक्लेशरणे कलियुगे पञ्चकषाये वर्त्तमाने लोकेऽनायके सार्थवाहोऽवभासकरः प्रदीपकरः अत्राणानां गन्धानां मार्गनिदर्शकः यत्र हि नामाहं प्रथमचित्तोत्पादेनैवमेवंरूपामनुत्तरां बोधिचर्यां सहायकाः प्रतिलब्धा ये मम जन्मान्तरेषु शीर्षप्रतिग्राहका भविष्यन्ति नयनकर्णनासाजिह्वाहस्तपादवत्सास्थिरुधिरं यावदन्नस्य प्रतिग्राहका भविष्यन्ति । पुनरपि कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वो रत्नगर्भस्य तथागतस्य पुरतो निषद्य आह । ये च मम भदन्त भगवन्तेषु तेष्वप्रमेयासंख्येयेषु कल्पकोटीनयुतशतसहस्रेषु जन्मान्तरेषु याचनका उपसंक्रामेयुर्यदि वान्नं यदि वा पानं । यावच्छिरः प्रतिग्रहीयुरन्तशो वालाग्रकोटीप्रमाणमात्रमपि मम दत्तदानं प्रतिग्रहीयुर्यावद्बोधिपर्यन्तेन । स चेदहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्य न तां सत्त्वां संसारात्परिमोचयेयं । तत्र पुनर्यः कश्चिच्छ्रावकयानेन वा महायानेन वा विसम्वादिता मे बुद्धा भगवन्तो भवेयुः । य एतर्हि दशसु दिक्षु यावान्मायाहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं[1] । पुनरपि कुलपुत्र रत्नगर्भस्तथागतो महाकारुणिकस्य बोधिसत्त्वस्य महासत्त्वस्य साधुकारमदासीत्साधु साधु सत्पुरुष एवंरूपं ते सत्पुरुष बोधिचारिकाप्रणिधानं यथा मेरुशिखरध्वजेन तथागतेन पूर्वं प्रथमचित्तोत्पादेन लोकेश्वरज्योतिषस्तथागतस्य पुरतः । एवंरूपया बोधिसत्त्वचर्यया प्रणिधानं कृतं । एवंरूपा बोधिसत्त्वचारिका चीर्णा यथा प्रणिधानं कृतं गङ्गानदीवालिकासमा महाकल्पाः । अतिक्रान्ता यथा तेन सत्पुरुषेण पुरिमायान्दिशि कोटिशतसहस्रे बुद्धक्षेत्रे वालप्रतिसंख्यायां लोकधातौ वर्षशतायुष्कायामनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धो ध्यानकुसुमविरजसमुद्गतप्रबोधीश्वरो नाम अभूत तथागतोऽर्हन् सम्यक्सम्बुद्धो भगवान्सचत्वारिंशद्वर्षाणि बुद्धकार्यं कृत्वानुपधिशेषे निर्वाणधातौ प्रविष्टः । तस्य खलु महाकारुणिकध्यानकुसुमविरजसमुद्गतप्रबोधीश्वरस्य तथा-

गतस्य परिनिर्वृतस्य वर्षसहस्रं सद्धर्मनेत्री अस्थासीत्सद्धर्मस्य तर्हि तस्य वर्षसहस्रं पुनः सद्धर्मप्रतिरूपकमस्थासीत् ।

ये खलु महाकारुणिकज्ञानकुसुमविरजसमुच्छ्रयबोधीश्वरस्य तथागतस्य परिनिर्वृतस्य सद्धर्मनेत्र्यवस्थितायां सद्धर्मप्रतिरूपका वा भिक्षुभिक्षुणी वा दुःशीलपापधर्माविषयसमुदाचाराः स्तौपिकवस्तुग्राहका लज्जिका वा धर्मपूजाच्छेदलब्धसंस्पृष्टा वा चातुर्दिशसङ्घस्य वा संमुखीभूतसङ्घस्य वा चीवरपिण्डपातशयनासनग्लानप्रत्ययभैषज्यपरिष्कारं वा छिन्नं यो फलिकपरिग्रहे यावदात्मना परिभुक्तं । गृहस्थानां वा दत्तं । तेन खलु महाकारुणिकज्ञानकुसुमविरजसमुच्छ्रयबोधीश्वरेण तथागतेन पूर्वेऽनुपूर्वेण व्याकृतास्त्रिभिर्यानैः । ये केचिन्महाकारुणिक तस्य भगवतः शासने रक्तकाषायप्रावृताः सर्वे ते अवैवर्त्तिका व्याकृतास्त्रिभिर्यानैः येऽपि केचिन्मूलापत्तिसमापन्ना भिक्षुभिक्षुण्युपासिका वा पूर्वमेव ते तेन तथागतेन शास्तृसंज्ञा कुशलमूलविपाकेन त्रिभिर्यानैरवैवर्त्तिका व्याकृताः ।

पुनरपरं कुलपुत्र स महाकारुणिको बोधिसत्त्वो महासत्त्वो रत्नगर्भस्य तथागतस्य पुरत आह । एवं मे भदंत भगवन् प्रणिधिर्यावदेवाहमनुत्तरायां बोधिचर्यायां चरमाणो यान् सत्त्वानहं दानपारमितायां नियोजयेयं । सदा दापयेयं प्रतिष्ठापयेयं । यावत्प्रज्ञापारमितायामन्तशो वालाग्रकोटिमात्रमपि कुशलमूले नियोजयेयं यावद्बोधिपर्य्यन्तेन चर्यां चरमाणो न तां सत्त्वां स्त्रिभिर्यानैरवैवर्त्तिकभूमौ स्थापयेयमन्तश एकसत्त्वमपि । विसंवादिता मे बुद्धा भगवन्तो भवेयुः । ये दशसु दिक्ष्वप्रमेयासङ्ख्येयेषु लोकधातुषु तिष्ठन्ति ध्रियन्ते यापयन्ति । धर्मं च देशयन्ति । मा चाहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं । अनुत्तरज्ञानप्रतिलब्धश्चाहं भदंत एववन्ति ये सत्त्वाः शासने काषायप्रावृता भवेयुः । यदि वा मूलापत्तिमापन्नाः स्युर्यदि वा दृष्टिव्यसनं प्रतिपन्नाः स्युर्यदि वा त्रिषु रत्नेषु स्खलिताः कृतापराधा भवेयुर्भिक्षुभिक्षुण्युपासकोपासिका य एकक्षणमपि मम सकाशे शास्तृसंज्ञां वा गौरवचित्तमुत्पादयेयुः । स चेदहं भदन्त भगवंस्तां सत्त्वां स्त्रिभिर्यानैरवैवर्त्तिकां न व्याकुर्यां अन्तश एकसत्त्वमपि रिञ्चेयुर्विसंवादिता मे बुद्धा भगवन्तो भवेयुर्मा चाहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं । बोधिप्राप्तस्य च मे भदन्त भगवन्देवमनुष्यसंस्कृतं गुरुकृतं मानितं पूजितं रक्तकाषायचीवरम्भवेत् । तद्दर्शनेन सत्त्वाः काषायकण्ठास्त्रिभिर्यानैरवैवर्त्तिका भवेयु ये सत्त्वाः क्षुत्तर्षपीडिता अन्नपानविरहिता यद्दारिद्र्यान्तशः यावल्लौकिकाः सत्त्वा ये काषायवस्त्रं लभेयुरन्तशश्चतुरङ्गुलमपि सर्वे तेऽन्नपानसम्पन्ना भवेयुः परिपूर्णाभिप्राया ये सत्त्वाः परस्परविरुद्धवैरबहुलाः परस्परयुद्धसंग्रामगता वा देवा वा यक्षा वा राक्षसा वा नागा वा असुरा वा गरुडा वा किन्नरा वा महोरगा वा कुम्भाण्डा वा पिशाचा वा मनुष्या वा संग्रामगताः काषायमनुस्मरेयुः ते सत्त्वाः करुणाचित्ता मृदुचित्ता अवैरचित्ताः कार्मण्यचित्ता भवेयुर्ये सत्त्वाः संग्रामे वा विवादे वा युद्धे वा कलहे वा काषायखण्डकमात्रं पूजार्थं सत्कारार्थं हरेयुस्ते सत्त्वाः सदा अपराजिता भवेयुरस्खलिता अविहेठिता [illegible] [illegible] संग्रामात्युद्धात् कलहात् विवादात् परिमुच्येयुः । यदि मे भदन्त [illegible] [illegible] पञ्चभिरार्यगुणैरिदं काषायं न समन्वागतं भवेत् । विसंवादिता मे बुद्धा भगवन्तो

सर्वेषु देशेषु दिक्षु यावत्पाचाहं शक्तः सकलं बुद्धकार्यं परिनिष्पादयितुं । धर्मं मे सम्मोद्गृहीतुमर्वाहं शक्तः अन्यतीर्थिका परिहर्तुं । ये च भदन्त भगवन्ममाभिसम्बुद्धस्य यावत्परिनिर्वृतस्य वा नमस्कारं करिष्यन्ति । नमः शाक्यमुनये तथागतायेति वाचं भाषिष्यन्ते तेषां सर्वकर्मावरणक्षयो भविष्यति । अन्तेवानुत्तरेण बुद्धपरिनिर्वाणेन परिनिर्वास्यन्तीति स च पुनः कुलपुत्र रत्नगर्भस्तथागतो दक्षिणं बाहुं प्रसारयित्वा करतलेन महाकारुणिकस्य बोधिसत्त्वस्य शिरःपरिमार्गयित्वाह । साधुसाधु सत्पुरुष कल्याणं ते प्रणिधानं भद्रकप्रतिविमर्शं एवमेव ते सत्पुरुष पञ्चभिरार्यगुणैरक्तकाषायं सत्त्वानामुपजीव्यं भविष्यति । सभा पुनः कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वस्तेन व्याकरणेन साधुकारप्रामोद्यप्रसादेन तथागतपुण्यदीर्घाङ्गुलिपरिच्छादितेन दक्षिणेन मृदुतरुणकरतलसंस्पर्शेन कुमारभूतः संवृत्तो विंशद्वर्षसदृशो जातिप्रमाणेन । पुनरपि कुलपुत्र सर्वावती सा पर्षा सदेवगन्धर्वमानुषा प्राञ्जलीभूता तस्मै महाकारुणिकस्य पूजाकर्मणे उद्युक्ताः पुष्पैर्धूपैर्महाकारुणिकस्य बोधिसत्त्वस्य महासत्त्वस्य पूजां कृत्वा विचित्रवर्णैः श्लोकैस्तुष्टाव ॥

इति करुणापुण्डरीके महायानसूत्रे बोधिसत्त्वे-
व्याकरणपरिवर्त्तश्चतुर्थः ।

स च पुनः कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वो रत्नगर्भस्य तथागतस्य पञ्चमण्डलेन पादौ शिरसा वन्दित्वा रत्नगर्भस्य तथागतस्य पुरतो निषसाद रत्नगर्भं तथागतं परिपृच्छत् । समाधानमुखनिर्देशसम्भारविशुद्धिमुखो धर्मपर्यायः बोधिसत्त्वानां मार्गो भगवता निर्दिष्टः कियता भदन्त भगवन् समाधानं मुखनिर्देशसम्भारविशुद्धिमुखो धर्मपर्यायो बोधिसत्त्वानां मार्गो भगवता निर्दिष्टः । कियता भदन्त भगवन् समाधानमुखनिर्देशसम्भारविशुद्धिमुखो धर्मपर्यायः परिपूर्णो भवति कियद्रूपेण वा भदन्त भगवन् संभारेण समन्वागतः कुलपुत्रो वा कुलदुहिता वा दृढप्रतिष्ठितो भवति कियद्रूपेण समाधानमुखनिर्देशेनालङ्कृतो भवति । स भोः पुनः कुलपुत्र रत्नगर्भस्तथागतोऽर्हन् सम्यक्सम्बुद्धो महाकारुणिकं बोधिसत्त्वमेतदवोचत् साधु साधु महाकारुणिक भद्रकः प्रश्नः कल्याणं ते प्रतिभानं । भूयस्या मात्रया त्वं महाकारुणिकाप्रमेयासंख्येयानां बोधिसत्त्वानां हितकरो बहुकरश्चोत्पन्नो यत्र हि नाम त्वं महाकारुणिक तथागतमिदमेवंरूपं प्रश्नं परिप्रष्टव्यं मन्यसे तेन हि महाकारुणिक शृणु । साधु च सुष्ठु च मनसि कुरुष्व महायानसंप्रस्थितानां कुलपुत्राणां । अस्ति महाकारुणिक शूरङ्गमो नाम समाधिर्यत्र समाधौ स्थितो बोधिसत्त्वः सर्वसमाधिष्वनुप्रविष्टो भवति अस्ति रत्नमुद्रो नाम समाधिर्येन सर्वसमाधयो मुद्रिता भवन्ति । अस्ति सिंहविक्रीडितो नाम समाधिर्यत्र स्थितः सर्वसमाधिभिर्विक्रीडति । सुचन्द्रो नाम समाधिः सर्वसमाधीनवभासयति । चन्द्रध्वजकेतुः समाधिः सर्वसमाधीनां ध्वजं धारयति सर्वधर्मोद्गतः समाधिः सर्वसमाधयोऽस्मान्निर्गच्छन्ति विलोकितमूर्द्धो नाम समाधिः सर्वसमाधीनां मूर्धं व्यवलोकयति । धर्मधातुनियतसमाधौ स्थितो बोधिसत्त्वः सर्वधर्मधातुनिश्चयाय

गच्छन्ति। नियतध्वजकेतौ समाधौ स्थितः सर्व्वसमाधीनां ध्वजं धारयति। वज्रे समाधौ स्थितः सर्व्वसमाधीन्निर्भिनत्ति। सर्व्वधर्म्मप्रवेशमुद्रे समाधौ स्थितः सर्व्वसमाधीन् मुद्रयति। समाधिराजसुप्रतिष्ठितेन समाधिना सर्व्वसमाधिषु राजवत् प्रतिष्ठितो भवति। रश्मिप्रमुक्तेन समाधिना सर्व्वसमाधिषु रश्मयो निश्चरन्ति बलव्यूहेन समाधिना सर्व्वसमाधिषु बलव्यूहं कारयति। समुद्गतेन समाधिना सर्व्वसमाधिषु गच्छति। निरुक्तिनियतेन समाधिना सर्व्वसमाधिवचनप्रवेशं प्रविशति। अधिवचनप्रवेशेन समाधिना सर्व्वसमाधीनामधिवचनानुप्रविशति दिग्विलोकनेन समाधिना सर्व्वसमाधीनवलोकयति। सर्व्वधर्म्मप्रवेशेन समाधिना सर्व्वधर्म्मप्रवेशतामनुप्रविशति। धारणीमुद्रेण समाधिना सर्व्वसमाधीनां मुद्रां धारयति। सर्व्वधर्म्मविविक्तेन समाधिना सर्व्वसमाधिषु विवेकधर्म्मतामनुप्रविशति असंप्रमोषेण समाधिना सर्व्वसमाधयो न मुष्यन्ति। सर्व्वधर्म्माचलेन समाधिना सर्व्वसमाधिष्वचलतायै सन्तिष्ठते। सर्व्वधर्म्मसमवसरणसागरमुद्रे समाधौ सर्व्वसमाधयः समुद्रं समवसरणं गच्छन्ति सर्व्वधर्म्मासमनूने समाधौ सर्व्वसमाधय उभयथायमनूनतां गच्छन्ति। आकाशस्फरणेन समाधिना सर्व्वसमाधय आकाशे स्फरति। सर्व्वधर्म्माच्छेदनेन समाधिना सर्व्वसमाधयोऽनुच्छेदं गच्छन्ति। वज्रमण्डलेन समाधिना सर्व्वसमाधीनां मण्डलं धारयति। सर्व्वधर्म्मकरसेन समाधिना सर्व्वसमाधीनां रसं धारयति। रणंजहेन समाधिना सर्व्वोपकरणक्लेशान् जहाति। सर्व्वधर्म्मानुत्पादेन समाधिना सर्व्वधर्म्मानुत्पादं निरोधं दर्शयति वैरोचनेन समाधिना सर्व्वसमाधीन् भावयति तपति विरोचति। सर्व्वधर्म्मनिरोधेन समाधिना सर्व्वसमाधीन् विभजति। अनिमिषेण समाधिना समाधयो न कदाचित् समाधिधर्म्मा ईयन्ते निकेतनसमाधिना सर्व्वसमाधिषु न कदाचिद्धर्म्मस्थितिं समनुपश्यति। गगनकल्पेन समाधिना सर्व्वसमाधौ गगनस्वभावा सागलाय समनुपश्यति। निश्चितेन समाधिना सर्व्वसमाधिषु चित्तचैतसिका धर्म्माः प्रहीयन्ते। रूपापर्य्यन्तेन समाधिना रूपमवभासयति। विमलप्रदीपेन समाधिना सर्व्वसमाधीनां प्रदीपं करोति सर्व्वधर्म्मापर्य्यन्तेन समाधिना सर्व्वसमाधिष्वपर्य्यन्तज्ञानं दर्शयति। विद्युदुन्मिषेण समाधिना सर्व्वसमाधिष्वपर्य्यन्तं ज्ञानं दर्शयति। सर्व्वप्रभङ्करेण समाधिना सर्व्वसमाधिषु प्रभङ्करमुखमुपदर्शयति। धातुपर्य्यन्तेन समाधिना सर्व्वसमाधीनपर्य्यन्तविज्ञापना यो यद्दर्शयति। समाधिशुद्धसारेण समाधिना शून्यतां समाधिधर्म्मेष्वनुप्राप्नोति। मेरुचित्रेण समाधिना सर्व्वधर्म्मेषु अचलतां सन्दर्शयति। विमलप्रभेण समाधिना सर्व्वसमाधीनामलमपकर्षयति। सर्व्वधर्म्मासम्प्रभेदेन समाधिना सर्व्वसमाधीनां व्युपकृष्टतां सन्दर्शयति। रतिकरेण समाधिना सर्व्वसमाधिषु रतिं प्रतिलभते। सर्व्वधर्म्मस्वभावविक्रीडितेन समाधिना सर्व्वसमाधिषु रूपानुपलब्धिं दर्शयति। विद्युद्धिकरणेन समाधिना सर्व्वसमाधिष्वलक्षणत्वं दर्शयति। सर्व्वधर्म्मानिक्षेपविरलेन समाधिना सर्व्वसमाधीनां विरलं ज्ञानमुपदर्शयति। अक्षयवते समाधिना सर्व्वसमाधीनां न क्षयं नाक्षयं दर्शयति। सर्व्वधर्म्माचिन्त्यशुद्धेन समाधिना सर्व्वधर्म्मां प्रतिभासोपमां दर्शयति। तेजोवता समाधिना सर्व्वसमाधिषु ज्ञानं ज्वालयति। क्षयापगतेन समाधिना सर्व्वसमाधीनक्षयानुगतां दर्शयति। अनिञ्जितेन समाधिना सर्व्वधर्म्मेषु नाञ्जति न वेपति न प्रपञ्चयति।

[illegible]

... समाधिना सर्वसमाधिषु ... न समनु-पश्यति । ... समाधिना सर्वधर्मेषु ... न समनुपश्यति । विमल-प्रदीपेन समाधिना सर्वसमाधिषु ... न समनुपश्यति । ... समाधिना सर्वधर्मस्वभावं ... । ... समाधिना सर्वसमाधिषु गुणपरिपूर्णो भवति । ... समाधिना सर्वसमाधिषु ... भवति सर्वलोकप्रदीपेन समाधिना सर्वधर्मेषु ... यति । समाधिसमताविशेषेण समाधिना सर्वसमाधिविशेषतां

गच्छन्ति। नियतध्वजकेतौ समाधौ स्थितः सर्व्वसमाधीनां ध्वजं धारयति। वज्रे समाधौ स्थितः सर्व्वसमाधीन्निर्भिनत्ति। धर्म्मप्रवेशमुद्रे समाधौ स्थितः सर्व्वधर्म्मान्मुद्रयति। समाधिराजसुप्रतिष्ठितेन समाधिना सर्व्वसमाधिषु राजत्वेन प्रतिष्ठितो भवति। रश्मिमुक्तेन समाधिना सर्व्वसमाधिषु रश्मयोऽवसरन्ति बलवीर्य्येण समाधिना सर्व्वसमाधिषु बलवीर्य्यतां कारयति। समुद्गतेन समाधिना सर्व्वसमाधिषु गच्छति। निरुक्तिनिर्द्देशेन समाधिना सर्व्वसमाधिवचनप्रवेशं प्रविशति। अधिवचनप्रवेशेन समाधिना सर्व्वसमाधीनां नामधेयान्यनुप्रविशति दिग्विलोकनेन समाधिना सर्व्वसमाधीनवलोकयति। सर्व्वधर्म्मप्रभेदेन समाधिना सर्व्वधर्म्मप्रभेदतामनुप्रविशति। धारणीमुद्रेण समाधिना सर्व्वसमाधीनां मुद्रान् धारयति। सर्व्वधर्म्मविविक्तेन समाधिना सर्व्वसमाधिषु विवेकधर्म्मतामनुप्रविशति अप्रमोषेण समाधिना सर्व्वसमाधयो न मुष्यन्ति। सर्व्वधर्म्माविलेन समाधिना सर्व्वसमाधिस्वचलतायै सन्तिष्ठते। सर्व्वधर्म्मसमवसरणसागरमुद्रे समाधौ सर्व्वसमाधयः सङ्ग्रहं समवसरणं गच्छन्ति सर्व्वधर्म्मासिन्यूने समाधौ सर्व्वसमाधय उभयव्ययमन्यूनतां गच्छन्ति। आकाशस्फरणेन समाधिना सर्व्वसमाधय आकाशे स्फरति। सर्व्वधर्म्मोच्छेदनेन समाधिना सर्व्वसमाधयोऽनुपच्छेदं गच्छन्ति। वज्रमण्डलेन समाधिना सर्व्वसमाधीनां मण्डलं धारयति। सर्व्वधर्म्मरसेन समाधिना सर्व्वसमाधीनां रसं धारयति। रणंज हेत समाधिना सर्व्वोपकरणक्लेशान् जहाति। सर्व्वधर्म्मानुत्पादेन समाधिना सर्व्वधर्म्मानुत्पादं निरोधं दर्शयति वैरोचनेन समाधिना सर्व्वसमाधीन् भावयति तपति विरोचति। सर्व्वधर्म्मनिरोधेन समाधिना सर्व्वसमाधीन् विभजति। अनिमिषेण समाधिना समाधयो न कदाचित् समाधिधर्म्मा एषन्ते निकेतनसमाधिना सर्व्वसमाधिषु न कदाचिद्धर्म्मस्थितिं समनुपश्यति। गगनकल्पेन समाधिना सर्व्वसमाधौ गगनस्वभावा सारत्वाय समनुपश्यति। निश्चित्तेन समाधिना सर्व्वसमाधिषु चित्तचैतसिका धर्म्माः प्रहीयन्ते। रूपापर्य्यन्तेन समाधिना रूपमवभासयति। विमलप्रदीपेन समाधिना सर्व्वसमाधीनां प्रदीपं करोति सर्व्वधर्म्मापर्य्यन्तेन समाधिना सर्व्वसमाधिष्वपर्य्यन्तज्ञानं दर्शयति। विद्युदुन्मिषेण समाधिना सर्व्वसमाधिष्वपर्य्यन्तं ज्ञानं दर्शयति। सर्व्वप्रभङ्करेण समाधिना सर्व्वसमाधिषु प्रभङ्करमुखमुपदर्शयति। धातुपर्य्यन्तेन समाधिना सर्व्वसमाधीनपर्य्यन्तविज्ञापना यो यद्दर्शयति। समाधिशुद्धसारेण समाधिना शून्यतां समाधिधर्म्मेष्वनुप्राप्नोति। अकचित्रेण समाधिना सर्व्वधर्म्मेषु असतां सन्दर्शयति। विमलप्रभेन समाधिना सर्व्वसमाधीनामलमपकर्षयति। सर्व्वधर्म्मासम्प्रभेदेन समाधिना सर्व्वसमाधीनां सुपक्वतां सन्दर्शयति। रतिकरेण समाधिना सर्व्वसमाधिषु रतिं प्रतिलभते। सर्व्वधर्म्मस्वभावविसंवादिनेन समाधिना सर्व्वसमाधिषु रूपानुपलब्धिं दर्शयति। विशुद्धिकारेण समाधिना सर्व्वसमाधिष्वलक्षणत्वं दर्शयति। सर्व्वधर्म्मानिःशेषविशेषेन समाधिना सर्व्वसमाधीनां विशेषं ज्ञानमनुदर्शयति। अनयनेन समाधिना सर्व्वसमाधीनां न शान्तं नाशयं दर्शयन्ति। सर्व्वधर्म्मनिष्प्रपञ्चेन समाधिना सर्व्वसमाधीनां प्रतिनाशोपमतां दर्शयति। सर्व्वोत्तरेण समाधिना सर्व्वसमाधिषु ज्ञानं स्फारयति। अवाप्तसमेन समाधिना सर्व्वसमाधीनमनाकुलतां दर्शयति। सर्व्वाङ्कुरेण समाधिना सर्व्वधर्म्मेषु आप्नोति न च्यवते न प्रपश्यति।

संवर्त्तते। परिणामना विविधकौशल्यसम्भारो बोधिसत्त्वानां बुद्धक्षेत्रपरिशुद्ध्या संवर्त्तते। उपायकौशल्यसम्भारो बोधिसत्त्वानां सर्वज्ञज्ञानपरिपूर्य्या संवर्त्तते।

अयं कुलपुत्र बोधिसत्त्वानां सम्भारविशुद्धिमुखो धर्मपर्य्यायः। पुनरपि कुलपुत्ररत्न-गर्भस्तथागतो महाबोधिसत्त्वपर्षदं व्यवलोक्य महाकारुणिकं बोधिसत्त्वं महासत्त्वमामन्त्र-यित्वाह। तत्र महाकारुणिकः कियद्रूपेण वैशारद्यालङ्कारेणालङ्कृतो बोधिसत्त्वो महासत्त्वः क्षान्तिं परिपूरयति। परमार्थदर्शिनो बोधिसत्त्वस्य महासत्त्वस्यामोघव्यायामपरिग्रहचित्तः। सर्वक्लेशधातुक्षयो परिग्रहचित्तः सर्वसत्त्वेभ्यः स उच्यते महावैशारद्यप्रशमनधर्मा यथाकाशा-यामि समचित्तं सर्वधर्मेषु। अयं महाकारुणिक-बोधिसत्त्वस्य वैशारद्यालङ्कारः॥

कथञ्च पुनः क्षान्त्याः परिपूरिर्भवति। अणुरपि तत्र धर्मं नोपलभते यदनुबुध्येयुः प्रतिबुध्येयुर्वा अविपाकधर्मानधिमुच्यते। यदुत मैत्र्याचैव नैरात्म्यञ्च करुणा च निःसत्त्वता च मुदितानि जीविता चोपेक्षा च निष्पुद्गलता च दानं च दान्तचित्तता च शीलं च शान्तचित्तता च क्षान्तिश्च क्षमाचित्तता च वीर्य्यं च विवेकचित्तता च ध्यानं च निध्याप्ति-चित्तता च प्रज्ञा चाप्युदारचित्तता च स्मृत्युपस्थानता च स्मृत्यमनसिकारचित्तता च सम्यक्-प्रहाणं चानुत्पादनिरोधचित्तता च ऋद्धिपादाश्च श्रद्धा चासङ्गचित्तता च स्मृतिश्च क्षयमू-चित्तता च समाधिश्च समापद्यानुचित्तता च। प्रज्ञेन्द्रियं चातीन्द्रियचित्तता च बलं च नयमर्षचित्तता च बोध्यङ्गाश्च बुद्धिप्रभेदनचित्तता च मार्गाश्च भावनाचित्तता च। शमथश्चो-पशमचित्तता च विपश्यता च सम्मोहचित्तता च आर्य्यसत्यभावना चात्यन्तपरिज्ञाभावना-चित्तता च। बुद्धमनसिकारश्चाकारचित्तता च धर्ममनसिकारश्च धर्मधातुसमाचित्तता च सङ्घमनसिकारश्चाप्रतिष्ठितचित्तता च। सत्त्वपरिपाचनादिविशुद्धिचित्तता च। सर्वधर्म-परिग्रहश्च धर्मधात्वसम्भेदचित्तता च। क्षेत्रपरिशुद्धिराकाशसमचित्तता च। लक्षणपारि-पूरिश्चालक्षणचित्तता च। क्षान्तिप्रतिलाभश्चानुपलम्भचित्तता च। अवैवर्त्तिकभूमिश्च संव-र्त्तानिवर्त्तचित्तता च। बोधिमण्डालङ्कारचित्तं च त्रैधातुकमण्डलचित्तता च। मारविघातचित्तं च सर्वसत्त्वेभ्यः सर्वसत्त्वानुग्रहचित्तता च बोधिश्च सर्वधर्मसमता च बोधिचित्तता च धर्म-चक्रप्रवर्त्तनं च सर्वधर्मं च सर्वधर्माप्रवर्त्तनचित्तता च। महापरिनिर्वाणसन्दर्शनं च संसार-स्वभावचित्तता च। अस्मिन्धर्मपर्य्याये भाष्यमाणे चतुःषष्टीनां बोधिसत्त्वशतसहस्राणां ये दशभ्यो दिग्भ्यो गृध्रकूटे पर्वते शाक्यमुनेस्तथागतस्यान्तिके पूर्वयोगसमाधानमुखनिर्देशं संसार-विशुद्धिमुखधर्मपर्य्यायं श्रवणार्थमागतास्तैरनुत्पत्तिकेभ्यो धर्मेभ्यः क्षान्तिः प्रतिलब्धा॥

शाक्यमुनिस्तथागत आह॥

अस्य खलु पुनः कुलपुत्र धर्मपर्य्यायस्य रत्नगर्भस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य भाषमाणस्याष्टचत्वारिंशतीनां गङ्गा-नदी-वालिकासमानां बोधिसत्त्वानां महासत्त्वानामनु-त्पत्तिकधर्मक्षान्तिप्रतिलाभोऽभूत्। चातुर्द्वीपिकलोकधातुपरमाणुरजःसमैर्बोधिसत्त्वैरेका-सत्त्वैरवैवर्त्तिकभूमिः प्रतिलब्धा बभूव। गङ्गा-नदी-वालिकासमानां बोधिसत्त्वानां महा-सत्त्वानामस्य समाधानमुखनिर्देशस्य सम्भारविशुद्धिमुखधर्मपर्य्यायस्य सकलपरिपूर्णविहार-ज्ञानाधिगमो बभूव। स च कुलपुत्र महाकारुणिको बोधिसत्त्वो महासत्त्वस्तेन प्रामोद्य-

प्रसादेन विंशतिवर्षसहस्राः कुमारभूतः संवृत्तो रत्नगर्भस्य तथागतस्य पृष्ठतः समनुबद्धोऽस्थात् । स च कुलपुत्र राजाम्बरशुद्धः सार्द्धं पुत्रसहस्रेणाशीतिभिश्च कोट्टराजसहस्रैरन्यैश्च ज्ञानवर्तिभिः प्राणकोटिभिः सार्द्धं निष्क्रम्य प्रव्रजितः शीले श्रुतसमाधिसौरत्यैरभियोगं कृतवान् । स च कुलपुत्रमहाकारुणिको बोधिसत्त्वो महासत्त्वोऽनुपूर्वेण चतुरशीतिधर्मस्कन्धसहस्राणि रत्नगर्भस्य तथागतस्य सकाशाच्छ्रावकयानकथां पठितवान्पर्यवाप्तवांश्च नवतिधर्मस्कन्धसहस्राणि प्रत्येकबुद्धयानकथायामुद्दिष्टवां पठितवान्पर्यवाप्तवान् । ततः सहस्रमनुत्तरमहायानकथायां । तथाकायस्मृत्युपस्थानकथामुद्दिष्टवान् । पठितवान् पर्यवाप्तवांश्च शतसहस्रं वेदनास्मृत्युपस्थानकथायां शतसहस्रं चित्तस्मृत्युपस्थानकथायां । शतसहस्रं धर्मस्मृत्युपकरणकथायामुद्दिष्टा पठिता पर्य्यवाप्ताश्च शतसहस्रं धातुस्कन्धकथा । शतसहस्रमायतनस्कन्धकथां । शतसहस्रं रागसंयोजनप्रहाणस्कन्धकथां । शतसहस्रं दोषसंयोजनप्रहाणस्कन्धकथां । शतसहस्रं मोहप्रहाणप्रतीत्यसमुत्पादस्कन्धकथां । शतसहस्रं समाधिविमोक्षस्कन्धकथां । शतसहस्रं वैशारद्यावेणिकबुद्धधर्म्मस्कन्धकथामुद्दिष्टवान् पठितवान् पर्य्यवाप्तवांश्च । यावद्दशधर्म्मस्कन्धशतसहस्रं रत्नगर्भस्य तथागतस्य सकाशादुद्गृहीतवान् पठितवानाप्तवांश्च । यावदपरेण कालसमयेन रत्नगर्भस्तथागतोऽर्हन् सम्यक्सम्बुद्धोऽनुपधिशेषे निर्वाणधातौ परिनिर्वृतः ।

स च कुलपुत्र महाकारुणिको बोधिसत्त्वः नानाविधाप्रमेयासङ्ख्येया वाद्यपुष्पचूर्णमाल्यगन्धविलेपनच्छत्रध्वजपताकारत्नैः पूजां कृतवान् । नानागन्धैश्च स्नापनं कृतवान् । शरीरप्रतिष्ठापनञ्च सप्तरत्नमयं स्तूपं कृतवान् । पञ्चयोजनमुच्चत्वेन अर्धयोजनं विस्तारेण ततः सप्तदिवसान्यप्रमेयासङ्ख्येया वाद्यपुष्पमाल्यगन्धविलेपनच्छत्रध्वजपताकारत्नैश्च पूजां कृत्वा पुनरपि तत्राप्रमेयासङ्ख्येयास्त्रिषु यानेषु समादापिता निवेशिताः प्रतिष्ठापिताः स तेषां सप्तानां दिवसानामत्ययेन चतुरशीतिभिः प्राणसहस्रैः सार्द्धं निष्क्रम्य केशश्मश्रूण्यवतार्य्य काषायाणि वस्त्राण्याच्छाद्य सम्यगेव श्रद्धयागारादनगारिकां प्रव्रज्य रत्नगर्भस्य तथागतस्य परिनिर्वृतस्य शासनं रक्षा(पा)लितवान् । दशवर्षसहस्राणि सद्धर्म्मधारको बभूव । तत्र चाप्रमेया सङ्ख्येयाः सत्त्वास्त्रिभिर्य्यानैः समादापयामास निवेशयामास प्रतिष्ठापयामास । त्रिशरणगमने च प्रतिष्ठापयामास । उपासकसंवरे च श्रामणेरसम्वरे उपसम्पदायां भिक्षुभावे ब्रह्मचर्य्यवासंवरे निवेशिताः प्रतिष्ठापिताः स बहूनि प्राणकोटीनयुतशतसहस्राणि अभिज्ञर्द्धिकौशल्ये च नियोजयित्वा सौरत्यब्रह्मचर्य्यवासे नियोजयित्वा शत्रुभूतेषु च स्कन्धेषु परिज्ञायां नियोजयित्वा शून्यग्रामायतनपरिज्ञायां नियोजयित्वा प्रतीत्यसमुत्पन्नाः सर्वधर्म्माः संस्कृतज्ञानपरिज्ञायां नियोजयित्वा प्रतिभासोऽयमानमरीच्युपमानुदकचन्द्रोपमान् सर्वधर्म्मान्दर्शयित्वानुत्पादानिरोधा प्रतिसन्धिनिरोधशान्तप्रशान्तोपशान्तपरमप्रणीतनिरोधनिर्वाणपरिज्ञानं दर्शयित्वा आर्य्याष्टाङ्गे मार्गे प्रतिष्ठापयित्वा कालं कृतवान् ।

एवमेव च ते सत्त्वास्तस्य महाकारुणिकस्य महाश्रमणस्य शरीरेषु शरीरपूजां कृतवन्तो यथा राज्ञश्चक्रवर्त्तिनः शरीरेषु शरीरपूजा क्रियते । यथैव तस्मिन्समये ते सर्वे महाकारुणिकस्य महाश्रमणस्य शरीरेषु शरीरपूजां कृतवन्तो यश्चासौ स्यात् महाकारुणिको

महाश्रमणः कालगतस्तस्मिन्दिवसे रत्नगर्भस्य तथागतस्य सद्धर्मोऽन्तर्हितश्च बोधिसत्त्वैर्महासत्त्वैः प्रणिधानवशेनान्यत्र लोकधातुषूपपत्तिः। केचित्प्रणिधानवशेन तुषितभवने उपपन्नाः। केचिन्मनुष्येषु केचिन्नागेषु केचिदसुरेषु केचित्प्रणिधानेन विविधासु तिर्यग्योनिषूपपन्नाः। कालगतश्च कुलपुत्र महाकारुणिको महाश्रमणः प्रणिधानवशेन दक्षिणायां दिशायामितो बुद्धक्षेत्राद्दशसु बुद्धक्षेत्रसहस्राण्यतिक्रम्य तत्र सङ्कर्षणो नाम लोकधातुरशीतिवर्षायुष्काश्च तत्र मनुष्या अकुशलमूला अधर्मप्रधाना रौद्रा लोहितपाणयः पापनिविष्टा व्यापन्नाः सर्वसत्त्वेषु। अमातृज्ञा अपितृज्ञा अपरलोकभयादर्शिनः प्रणिधानवशेन महाकारुणिको महाश्रमणस्तत्र सङ्कर्षणे बुद्धक्षेत्रे चण्डालकुल उपपन्नोऽभूत् स जातीबोधिसत्त्वशरीरोऽभूदतीवबलवानतीवस्मृतिमानतीवप्रतिभानवानतीवबलसमगतोऽभूत् स दृढेन बलवेगेन सत्त्वान् संगृह्यैवमाह। यदि यूयम्भो सत्त्वा अदत्तादानात् प्रतिविरमत काममिथ्याचाराद्यावन्मिथ्यादृष्टेः प्रतिविरमत तदहं युष्माकं जीवितं प्रयच्छामि जीवितोपकरणानि च दास्यामि।

अथ च पुनर्न प्रतिविरमत। अहं जीविताद्व्यपरोपयित्वा प्रक्रमिष्यामि। ततस्ते सत्त्वा अञ्जलिं प्रगृह्याहुः। वयमिदानीं तव नायक वचनेनाद्यग्रेण यावज्जीवमदत्तादानाद्यावन्मिथ्यादृष्टेः प्रतिविरमामः। स बलचण्डालो गत्वा राज्ञो वा राजभट्टानां वा निवेदयति। जीवितोपकरणेन मे प्रयोजनमन्नेन वा पानेन वा खाद्येन वा भोज्येन वा पेयवस्त्रशय्यागन्धहिरण्यसुवर्णमणिमुक्तिवैडूर्यशङ्खशिलाप्रवालरजतजातरूपैर्वा प्रभूतानि जीवितोपकरणानि दत्त मम बलचण्डालः सत्त्वान् यावज्जीवं दशसु कुशलेषु कर्मपथेषु प्रतिष्ठापयामास। ततस्ते मनुष्याः पञ्चवर्षशतायुष्का बभूवुः। यश्च तत्र राजा स कालगतः ततस्तैरामात्यैः सबलः चण्डालो राजाभिषेकेनाभिषिच्य राज्ये प्रतिष्ठापितो पुण्यबलो नाम संस्कृतः॥

अथ कुलपुत्र राजा पुण्यबलो न चिरेणैव तं विषयमनुश्रावितवान् दृढवीर्यपराक्रमेण द्वितीयं विषयं समनुश्रावितवान्। यावद्राजा पुण्यबलेन चिरेण सर्वजम्बूद्वीपे राजाबलचक्रवर्ती बभूव। यदा च राज्ञा पुण्यबलेन सर्वजम्बूद्वीपं राजत्वं प्रतिगृहीतं ततः पश्चात् सत्त्वाः प्राणातिपातविरमणे समादापिता निवेशिताः प्रतिष्ठापिताः। एवमदत्तादानाद्यावन्मिथ्यादृष्टिवैरमण्ये समादापिता सम्यग्दृष्ट्यां प्रतिष्ठापिता यथाभिप्रायाः सत्त्वास्त्रिषु यानेषु समादपिता निवेशिताः प्रतिष्ठापिताः॥

अथ राजा पुण्यबलः सर्वजम्बूद्वीपिकान् सत्त्वान् दशकुशलेषु कर्मपथेषु प्रतिष्ठापयित्वा त्रिषु यानेषु सन्नियोज्य सर्वजम्बूद्वीपे घोषमनुश्रावयामास। ये केचिद्याचनका अन्नार्थिका यावद्रत्नार्थिका वा ते सर्वे आगच्छन्तु। अहं सर्वदानानि दास्यामि ततो अपरेण कालसमयेन सर्वजम्बूद्वीपिकाः सत्त्वा आगत्वा राजानं पुण्यबलं याचितवन्तः राजापि पुण्यबलस्तान्सत्त्वान् विविधानि दानानि दत्तवान्। तत्र लोहघोषो नाम जीवको राजानं पुण्यबलमुपसंक्रम्याह। यदि त्वं महाराज विविधं महादानपतित्वानां परित्यजसि। अनुत्तरां सम्यक्सम्बोधिमाकाङ्क्षसि यदि त्वं महाराज ममाज्ञां परिपूरयिष्यसि त्वं महाराज लोकप्रदीपो जिन इति।

गन्ति । न च परस्य भयं दर्शयन्ति । न श्रावकप्रत्येकबुद्धयाने सत्त्वां समादापयन्ति । इत्यर्थं तेषां बुद्धानां भगवतां परिपूर्णाभिप्रायाणां परिशुद्धं बुद्धक्षेत्रं भवति । न च तत्र बुद्धक्षेत्रे आपत्तीनाम । न शिक्षासंवरणस्य न च परुषवचनं श्रूयते न चाकुशले शब्दः । अन्यत्र धर्मशब्देन तद्बुद्धक्षेत्रमपगतामनापशब्देन स्फुटं भवति । यथा कामकरणीया च तत्र श्रावकप्रत्येकबुद्धयानस्य नाम प्रज्ञाभिप्रादुर्भावोऽस्ति । यदा च मया गङ्गा-नदी-वालिकासमेषु महाकल्पेषु गङ्गा-नदी-वालिकासमेषु शून्येषु पञ्चकषायेषु बुद्धक्षेत्रेषु परुषवचनभयेन सत्त्वाः प्राणातिपातवैरमण्ये समादापिता न च त्रिषु यानेषु समादापिता निवेशिताः प्रतिष्ठापिताऽपि न कर्मविशेषेण मे तथैव परिक्लिष्टं बुद्धक्षेत्रं अकुशलशब्देनापूरितं अकुशलमूलसमवधानगतैः सत्त्वैः परिपूर्णं त्रिभिश्च यानैर्धर्मं देशयामि । यथा च मे पूर्वप्रणिधानं कृतं तथायं बुद्धक्षेत्रं परिगृहीतं । यादृशाश्च मे सत्त्वा वैनेयाः परिगृहीतास्तादृशेनैव बलवीर्य्यारम्भेण बोधिचारिकाः चीर्णाः । यादृशं चैव बीजं मर्जितं तादृशं बुद्धक्षेत्रं प्रतिलब्धं । यथायं मया प्रणिधानं कृतं संक्षेपेण ते कुलपुत्र दानपारमितां कथयिष्यामि । यथा मया बोधिसत्त्वचारिकां चरमाणेन दानं परित्यक्तं । अनागते सत्पुरुषाः धरणिदत्तो नाम सत्पुरुषो बभूव दक्षिणायां दिशायां सर्वघोषायां लोकधातावनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धः सङ्कुसुमेन्द्रचिर्नाम तथागतो वर्षशतायुष्कायां प्रजायां धर्मं देशयति । स सप्तमे दिवसे परिनिर्वास्यति । एवं वीर्य्यसंचोदनो नाम बभूव बोधिसत्त्वः यः पुरिमायां दिशायामजयवत्यां लोकधातावनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धः । वर्षशतायुष्कायां प्रजायां बुद्धकार्य्यं कृतवान् गङ्गा-नदी-वालिकासमा कल्पातिक्रान्ताः ।

यदा स तथागतोऽनुत्तरपरिनिर्वाणेन परिनिर्वृतः । अद्यापि तस्य महाकारुणिकस्य शरीराणि शून्येषु बुद्धक्षेत्रेषु पञ्चकषायेषु बुद्धकार्य्यं कुर्वन्ति । एवं च वदन्ति सारकुसुमितो बोधिसत्त्वो दृढवीर्य्यसमाधानो बलवेगपरित्यागेन बोधिसत्त्वचारिकां चरति दशगङ्गा-नदी-वालिकासमैर्महाकल्पैरतिक्रान्तैः पश्चात् स तस्योत्तरायां दिशायां षष्टितुसङ्गारणो नाम *भविष्यति पञ्चकषाये बुद्धक्षेत्रे तत्रासौ सत्पुरुषोऽनुत्तरां सम्यक्सम्बोधिमभिसम्भोत्स्यति सद्धेतुक्लेशविध्वंसनराजो नाम भविष्यति । तथागतोऽर्हन् सम्यक्सम्बुद्धो यावद्बुद्धो भगवान् । प्रज्ञाविसंक्लोपितदंष्ट्रो नाम बोधिसत्त्वः सत्पुरुष एकस्य महाकल्पस्यात्ययेन पश्चिमायान्दिशि भैरवती नाम लोकधातुर्भविष्यति । पञ्चकषाये वर्षशतायुष्कायां प्रजायामनुत्तरां सम्यक्सम्बोधिमभिसम्भोत्स्यते सूर्य्यगर्भो च विमलेन्द्रो नाम भविष्यति तथागतोऽर्हन् सम्यक्सम्बुद्धो भगवान् ।

अथ पुनः संरोचनागगनातिक्रान्तैः कल्पैर्निर्दिष्टैकपश्चिमायान्दिशि क्षारवर्षनिकुञ्जितायां लोकधातौ पञ्चकषाये तीव्रकलुषसङ्क्षोभने कल्पेऽसौ संरोचनः पूर्वप्रणिधानेन पञ्चाशद्वर्षायुष्कायां तत्र क्षारवर्षनिकुञ्जितबुद्धक्षेत्रेऽनुत्तरां सम्यक्सम्बोधिमभिसम्भोत्स्यते । अचिन्त्यरोचनो नाम तथागतो भविष्यति यावद्बुद्धो भगवान् स पूर्वप्रणिधानेन दशवर्षाणि सकलबुद्धकार्य्यं कृत्वा परिनिर्वास्यति । तस्यैव दिवसे तस्य तथागतस्य सद्धर्मोऽन्तर्धास्यति दशवर्षाणि पुनस्तं बुद्धक्षेत्रं शून्यं भविष्यति । ततः पश्चादसौ महाभिसवाङ्-

[illegible]

विरोचसे बुद्ध गणेन सूर्यः
अभ्युद्गतो [illegible] ।
[illegible] विनायका
आलोकभूता सुगता नमोऽस्तु ते ॥

बहुभिः कल्पान [illegible] भाविता
पर्य्येषमाणो गति अप्रबोधिं ।
बहूजिना पूजित पूर्वे ये त्वया
न चैव ते व्याकर्षीमतीतनायकाः ॥

प्रहीणरागा परिमुक्तचित्ता
छत्त(न्त)न्ति कार्य्यं इह सर्वलोके ।
प्रनष्टमार्गो न देशेसि धर्मं
सत्त्वांश्च उत्तारयसे भवार्णवात् ॥

वयम्पि प्रव्रज्य स्वयम्भूशासने
या प्रतिमोक्ष जिनश्चिचदेशिता ।
वयम्पि शिचलसमाहितेन्द्रिया
तवैव आसन्न सदा भवेमः ॥

अनिश्रिता जीवितकर्म्मकामा
शास्तारमाज्ञाय श्रुणित्व धर्मं ।
आस्वाद लप्स्यस्यभिषेकभूमि
जिनोसि व्याकर्षी इदमेव अर्थं ॥

भगवानाह । तौ च कुलपुत्र द्वौ अनुत्पादितबोधिचित्तौ इमौ च संरोचनः प्रहसितः ते चत्वारो धर्मिदत्तो वीर्य्यसङ्कोचनः सारकुसुमितः मञ्जार्चिः सङ्कोपितदष्टः इमे षट्सु पुत्रा मया प्रथमं बोधाय समादापिताः । शृणु भूतपूर्व्वं कुलपुत्रातीतेऽध्वनि असंख्येयैरप्रमाणैः कल्पैरतिक्रान्तैः यदासीत्तेन कालेन तेन समयेनेदं बुद्धक्षेत्रमजरमेरगुप्तं नामाभूत् । तदाहं महाकल्पे वर्त्तमाने वर्षशतायुष्कायां प्रजायां गन्धप्रभस्य तथागतस्य शासने सद्धर्म्मप्रतिरूपके वर्त्तमानेऽहमेव कुलपुत्र तेन कालेन दुर्धरो नाम बभूव बलचक्रवर्त्ती जंबूद्वीपविजयी । षट्च मे पुत्रा बभूवु । तानप्यहमनुत्तरायां सम्यक्सम्बोधौ समादापितवान् । तेऽप्यपरेण समयेन निष्क्रम्य गन्धप्रभस्य तथागतस्य शासने प्रव्रजितास्ते च भूयस्या मात्रया गन्धप्रभस्य तथागतस्य शासनं व्या(पा)लितवन्तः । व्यापयित्वा षट्पुत्रा येन प्रव्रजिता न चाशक्नुवन् बोधिचित्तमुत्पादयितुं अहञ्च पुनः पुनर्व्विज्ञापयामि को युष्माकमभिप्रायो यद्यूयं बोधिचित्तं नोत्पादयथ न च प्रव्रजथ । ते आहुः । न वयं प्रव्रजामः तत्कस्माद्धेतोः यः कषायकाले सद्धर्म्मप्रतिरूपके वर्त्तमाने प्रव्रजिताः शक्तः सकलं शीलस्कन्धमाराधयितुं न च [illegible] भवति मानः संसारपङ्के । पुनश्च मनुष्यसत्त्वाः कदाचित्प्रभृति नित्यं त्रिष्वपायेषु परिवसन्ति [illegible] न समादापयन्ति तस्माद्वयं न प्रव्रजामः । तानहं पुनः पृष्टवान् किं पुनर्यूयं बोधौ चित्तं नोत्पादयथ त आहुर्यद्यस्माकं सर्व्वं जंबूद्वीपं दद्यादेवं वयमनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयेम । तदहं कुलपुत्र श्रुत्वा [illegible] एवं चिन्तयामि । यथा सर्व्वे जंबूद्वीपका मनुष्यास्त्रिषु शरणगमने प्रतिष्ठापिता आर्याष्टाङ्ग-उपोषधधर्मे समादापितास्त्रिषु च यानेषु समादापिता यन्नूनमहमिमं जंबूद्वीपं षड्भागं कृत्वा सर्व्वान् पुत्राणां दत्त्वा [illegible] उत्तरायां सम्यक्सम्बोधौ समादापयेयं । अहञ्च निष्क्रम्य प्रव्रजेयं । एवं सर्व्वं जंबूद्वीपं षड्भागं कृत्वा पुत्राणां दत्तं । अहञ्च निष्क्रम्य प्रव्रजितश्च षड्जम्बूद्वीपराजानः परस्परविरुद्धाः [illegible] सर्व्वजंबूद्वीपमिदं [illegible] न [illegible] न [illegible] । [illegible] न [illegible] । [illegible] । तदाहमेवं चिन्तयामि [illegible] [illegible] प्रातिहार्यमकरोत् ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible]
[illegible] ।

अर्थं करो मेऽद्य सदेवलोके
भवेय मह्यं वहुमांसशोणितं ॥

शृण्वन्तु नागानरदेवयक्षा
ये देवताशैलगिरौ निवासिनः।

कृपा ममोत्पन्न यसत्वहेतोः
तर्पय्यसे त्वां स्वकमांसशोणितैः ॥

यदा च मया कृतं प्रणिधानं क्षुभितास्त्रयो लोकाः कम्पिता धरणी चलितो मेरुः रुदन्ति देवगणास्ततोऽहमात्मानन्दशपालात्पर्यन्तोत्पातयामास ॥ प्रणिधानवशेन मम पर्व्वत-प्रमाण आत्मभावः संवृत्तः। योजनशतं विस्तारेण योजनमुच्चत्वेन ॥ यावन्मनुष्यसुगपक्षिणः आरब्धा मांसरुधिरं भक्षयितुं। मम च कुलपुत्र सकायः सत्त्वैः परिभुज्यमानः प्रतिदिनं वर्द्धते योजनशतसहस्रं विस्तारेण संवृत्तः। योजनसहस्रमुच्चत्वेन सर्व्वत्र मानुषशिरा प्रादुर्भूता सयोभकर्णनयननासौष्ठदन्ताः सजिह्वा अनेकमुखशतसहस्राः प्रादुर्भूताः ते च मुखा मनुष्य-शब्देन घोषयन्ति। 'भोः सत्त्वा भो गृह्णाय येनार्थमान् सम्परिभुङ्क्षय। रुधिरं पिवथ नयनानि गृह्णय कर्णनासां योशौष्ठदन्तजिह्वां गृह्णाय। यस्यार्थं येनार्थं यावदर्थं सर्पितशरीराः परिपूर्णा-भिप्राया अनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयथ। श्रावकयानेन वा प्रत्येकबुद्धयानेन वा। अयं युष्माकमुपभोगपरिभोगो न क्षीयते न च युष्माकं शङ्कादेयं भविष्यति मात्रः। [illegible] जीवितक्षयो भवतु। ये च तत्र विज्ञाः सत्त्वा स्ते केचिच्छ्रावकयाने चित्तमुत्पादयन्ति केचि-त्प्रत्येकबुद्धयाने केचिदनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयन्ति। केचित् पुनर्देवमनुष्यो-पपत्तौ चित्तान्युत्पादयन्ति। मांसमक्षयन्ति रुधिरं पिवन्ति। केचिन्नयनानि गृह्णन्ति केचि-त्कर्णौ केचिन्नासां केचिदोष्ठौ केचिद्दन्तां गृह्णन्ति गृहीत्वा प्रक्रामन्ति प्रणिधानवशेन यावन्त्य प्रादुर्भवति मांसं न क्षान्तो भवति न परिक्षयं गच्छति। यावद्दशवर्षसहस्राणि सर्व्वं जम्बुद्वी-पका मनुष्या यावद्गपक्षिणोऽपि स्वशरीरेण सन्तर्पयामास तेषु दशभिर्व्वर्षसहस्रैर्गङ्गा-नदी-वालिकासमानि मया नेत्राणि परित्यक्तानि। चतुःसमुद्रोदकप्रमाणं मया रुधिरं परित्यक्तं। सुमेरुसहस्रप्रमाणं मया मांसं परित्यक्तं। चक्रवाडपर्व्वतप्रमाणं मया जिह्वापरित्यक्ता [illegible]-सुमेरुप्रमाणा मया कर्णाः परित्यक्ता विपुला सुमेरुप्रमाणा मया नासाः परित्यक्ता। एवं [illegible]पर्व्वतप्रमाणा मया दन्ताः परित्यक्ताः। कृत्स्नं सर्व्वं सुजुर्ज्ज [illegible] [illegible] परित्यक्तं मम कुलपुत्र दशवर्षसहस्राणि [illegible] सद्भूता परिणामाः [illegible] परित्यक्ताः [illegible] [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

स्वमांसरुधिरचर्म्मनयनकर्णनासोष्ठजिह्वाभिः सन्तर्पयित्वा त्रिषु यानेषु समादापयेयं मनुष्या यचरासत्वा सर्व्वतिर्य्यग्योनिकाये केचिन्मांसरुधिरभोजनाहाराः पृथग्यथा यावदन्तशः । याम-लौकिका तांश्चाहं सन्तर्पयेयं । यथा चाहमेकस्मिं बुद्धक्षेत्रे स्वशरीरेण सर्व्वसत्वां सन्तर्पयेयं । एवमेव समन्ताद्दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु बुद्धक्षेत्रेषु स्वमांसरुधिरचर्म्मनयना यावज्जिह्वाभिरेवं रूपेणात्मभावेन गङ्गा-नदी-वालिकासमान्महाकल्पान्तेषु तेषु बुद्धक्षेत्रेषु अकायजीवितेन सत्वां सन्तर्पयेयं । एवंरूपमात्मभावं प्रतिलभ्य विषम्वादिता मे बुद्धा भगवन्तो भवेयु र्ये दशसु दिक्ष्वन्येषु बुद्धक्षेत्रेषु प्रवर्त्तितधर्म्मचक्राः तिष्ठन्ति यापयन्ति धर्मं च देशयन्ति*। माहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं मा चाहं संसारे संसरमाणो बुद्धशब्दं शृणुयां माच धर्म्मशब्दं मा सङ्घशब्दं मा पारमिताशब्दं मा मारबलपराजयशब्दं मा वैशारद्य-शब्दं यावत्कुशलशब्दमपि संसारे मा शृणुयां नित्यञ्चावीचौ नरके समवेयं यदि मे एवं रूपः स्वशरीरपरित्यागः सत्वसन्तर्पणार्थेन सम्पद्यते नैवं रूपं च मे प्रणिधानं परिपूरिं स्यादाशा मे आशा चिन्तिता । येऽपि चैतस्मिन् बुद्धक्षेत्रे सर्व्वत्र द्वीपेष्वेकैकस्मिं द्वीप एवं रूपा आत्म-भावाः परित्यक्ताः सत्वाश्च मांसरुधिरेण सन्तर्पिता एवं दशसु दिक्षु गङ्गा-नदी-वालिकासमे-ष्वन्येषु बुद्धक्षेत्रेषु सत्वा एवंरूपेणात्मभावेन स्वमांसरुधिरेण सन्तर्पिताः । यथा कुलपुत्रास्य तथागतस्य दानपारमिता आत्मभावपरित्यागं ये महानुभवन्तेन तत्काले येषां परित्यक्ताः तेषां पुनरयं जम्बूद्वीपे यावत्त्रयस्त्रिंशद्देवपर्यन्तप्रमाणो राशिर्भवेत् ।

अयं कुलपुत्र तथागतस्य सङ्क्षिप्तेन आत्मपरित्यागदानपारमिता । पुनरपरं कुलपुत्र सतः पश्चादप्रमेयानां कल्पानामत्ययेन अयं बुद्धक्षेत्रमन्धविद्युतं नाम बभूव । अहं चास्मिं जम्बूद्वीपे राजा बभूव । महाप्रणादो नाम बलवांश्चक्रवर्त्ती एवं च मया सर्व्वजम्बुद्वीपकाः सत्वाः कुशलेषु नियोजिता यथापूर्व्वोक्तं । पश्चादहमुद्यानभूमिं निर्यातः रत्नप्रदर्शनाय तत्र चाहं पुरुषमद्राक्षं । पश्चाद्बाहुबन्धनं वध्यमानं दृष्ट्वा मयामात्याः पृष्टाः किमनेन पुरुषेण कृतं अमात्या मां प्रत्यूचुः पुरुषो देवस्य साधराधिकार देवस्य पुरुषस्य [illegible] ग्रामं याना *पोपपद्यते । ततो देवस्य शतकार्षो देयः । यथान्ये कुटुम्बिनो ददत्यायद्वारं । ये देवस्य नगर-स्य जनपदकर्वटेषु प्रतिवसन्ति कर्मान्तेन जीविकां कल्पयन्ति । तं चैव पुरुषो न ददाति । तावद्देवैतदर्थं । उच्यते एवं पुरुषं मा कश्चिद्बलान्ननान्यं गृह्णीत ये कामयन्ति देव न कश्चित्पुरुषपूर्व्वपतो ददाति यद्देवस्य दिवसादिवसेन यानयानपरिभोगो देवानां देवस्य योऽन्तःपुरं देवस्य पुत्राणां दुहितॄणां उपभोगपरिभोगः सर्व्वं ततः सकाशाद्भूयात् । न च कोशसम्पत्तः प्रपश्यति । ततोऽहं परमदुर्मनाश्चिन्तयामि ममाहमिदं सर्व्वं जम्बूद्वीपं राज्ये-श्वर्य्यं ददामि । तत्र पञ्चपुत्रशतानि वस्त्रालङ्कारेण [illegible] समादापयित्वा एकं जम्बूद्वीपं पञ्चधान-शतानि कृत्वा पुत्राणां प्रदत्तं । अहं च तपोवनं गत्वा [illegible] तपश्चर्यां चचार । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

तस्य चिन्तामणिं गृहीत्वा समाश्वस्तः ततः क्षुभितः समुद्रनागा आकुला रुदन्ति देवतायास्तत्र निदेशिनास्तत्र चाश्वक्षोनाम ऋषिर्बोधिसत्त्वः पूर्व्वप्रणिधानेन तत्रोपपन्नः तेन महासत्त्वेन संसार्थः स्वस्तिना क्षेमेण च महासमुद्रादुत्तारितस्तस्य च सार्थवाहस्यान्यतरो दुष्टो राक्षसः प्रत्यर्थिकोऽवतारप्रेक्षी विवरगवेषी पृष्ठतः पृष्ठतः समनुबद्धः तेन सप्तदिवसानि परमकलुषा वातवृष्टिरवसृता यतस्ते वणिजः प्रनष्टमार्गा परमभीता उच्चस्वरेण रुदन्ति रुदन्ति परिदेवन्ति देवन्ति वा याचन्ति। शिववरुणां यावन्मातापितरमाक्रन्दति प्रियपुत्रां यावदश्रौषीद्दिव्येन श्रोत्रेण यावत्तत्रागत्वा वणिजः समाश्वासितः समागतोऽस्माभायः अहं युष्माकं मार्गमुपदर्शयिष्यामि यावज्जंबूद्वीपं स्वस्तिना क्षेमेण च प्राप्स्यथ तदाहम्मदूतैलेन प्रदीपयित्वा स्वहस्तं वेष्ट्य अग्निना प्रज्वाल्य सत्यवचनमकरोत्। यदि मया षड्विंशद्वर्षाचतुर्भिर्ब्राह्मैर्विहारैर्वनषण्डनिवासिनां सत्त्वानामर्थाय हिताय नवमूलफलाहारेण चतुरशीतीनां नागयक्षसहस्राणां चित्तसन्ततिः परिपाचिता अवैवर्त्तिकाश्च स्थापिता अनुत्तरायां सम्यक्सम्बोधौ तेन सत्येन सत्यं वचनेन कुशलमूलपरिपाकेन ज्वलतु मे हस्तं लभन्तु मार्गं वणिजः स्वस्तिना क्षेमेण जंबूद्वीपं प्रापयन्तु। यावत्सप्तरात्रिदिवसाः स्वहस्तं ज्वलितवान्। ते वणिजो जम्बूद्वीपे स्थापितास्तत्र मया प्रणिधानं कृतं यदा जम्बूद्वीपं रत्नपरिहीणं भवेत्। तदहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं। तदा इयं मे आशा परिपूर्यतु। सार्थवाहो भवेयं जम्बूद्वीपे सप्तवारां चिन्तामणिमानयित्वा विविधं रत्नवर्षमभिप्रवर्षयं। यावत्सर्व्वद्वीपेष्वस्मिं बुद्धक्षेत्रे एवमेव दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु शून्येषु बुद्धक्षेत्रेषु पञ्चकषायेषु रत्नं प्रवर्षयेयं यावत्पूर्व्वोक्तमेवं च मे आशापरिपूर्णानां गङ्गा-नदीवालिकासमानां महाकल्पानामन्तरेण सार्थवाहोऽभूवम् गङ्गा नदी-वालिकासमेषु शून्येषु पञ्चकषायेषु बुद्धक्षेत्रेषु रत्नानि प्रवर्षितानि। एकैकद्वीपे सप्तवारां विविधं रत्नवर्षं प्रवर्षितं एवमप्रमेया सङ्ख्येयाः सत्त्वा रत्नैः परिपूर्णाभिप्रायाः कृतास्त्रिषु च यानेषु नियोजिताः यथा कुलपुत्र तथागतस्य रत्नपरित्यागलक्षणं विपाककुशलमूलं। पुनरपरं कुलपुत्राप्रमेयाणां कल्पानामत्ययेनान्तरेणायं बुद्धक्षेत्रस्तिमिरनामाभूत् सन्तारके कल्पे वर्त्तमाने पञ्चकषाये पञ्चवर्षमात्रस्त्रिकायां प्रजायां प्रणिधानेनाहमस्मिं जम्बूद्वीपे सुगन्धमालगन्धो नाम ब्राह्मणोऽभूवम् वेदपाठकः तत्कालं च सत्त्वा भूयसा शास्त्रदृष्योऽभूवन् सत्त्वैरपराक्रमाः सफलदाधिष्ठानाः तेषां चाहं महाबलवेगपराक्रमेण सत्त्वानां शत्रुभूतं स्कन्धप्रवर्तनेन धर्मं देशयामि शून्यग्रामायतनप्रत्यवेक्षणाप्रत्ययमनुबद्धं सोत्पादव्ययं अनाचारकृतमनस्कारं दर्शयामि। तेऽनुत्तरायां सम्यक्सम्बोधौ चित्तोत्पादे न कुशलमूले परिणामनाभियोजिताः स्वयमेव चाहं पञ्चाभिज्ञ संवृत्तः तेन च [illegible] सङ्ख्या सत्त्वा [illegible] पञ्चाभिज्ञाः संवृत्ता एवमप्रमेया सङ्ख्याः [illegible] मूलफलाहारा [illegible] स्थिताः। तत [illegible] कल्पे यदा निर्विशतां [illegible] [illegible] प्रशान्ताः। [illegible] [illegible] [illegible] बभूवुः। [illegible] [illegible] [illegible] स्पर्शं [illegible] न [illegible]। [illegible]

लोकपालां अन्ये च देवा ऋषयो वा मनुष्यपर्षद्य सन्निपातयेयं भैषज्योपकरणशास्त्रं सत्त्वानां हितार्थमुपदर्शयेयं तदहमुत्क्षा गत्वा शक्रब्रह्मलोकपाल देवर्षीणां नागर्षीणां मनुष्यर्षीणां मारो एक विदूपतिर्नाम पर्व्वतः तत्र सन्निपातयित्वा विहुचरकमूर्धनि नामधानं भूत-सन्निवारणप्रतिशरणं रत्नावातपित्तश्लेष्मसमप्रशमनशास्त्रं निर्देशयेयं । पेयालं । अप्रमेयासंख्येयानां सत्त्वानां व्याधिप्रशमनं कृतं तत्र मयाप्रणिधानं कृतं यथा मयैकदिवसेऽप्रमेयासंख्येयानां सत्त्वानां महावभासः कृतः त्रिषु च यानेषु नियोजिता अपायपथाः पिधिताः स्वर्गपथप्रतिष्ठापिता विविधाश्च व्याधयः प्रशमिताः परिमोचिताश्च । एवमप्रमेयाणामसंख्येयानां सत्त्वानां महालोकधी दत्तः सौख्ये च स्थापिताः । तदनेन कुलपुत्र कुशलमूलविपाकेन इयं मे प्रणिधानाशाःपरिपूर्णाः यदा च मयैकदिवसेऽप्रमेयाणामसंख्येयानां सत्त्वानामपायपथा निरोधिताः स्वर्गपथे च प्रतिष्ठापिता ग्लानप्रत्ययापकरणार्थं देवर्षिपक्षसङ्घाः सन्निपातिताः सत्त्वानामर्थाय विहुस्वरमूर्धनि देवलोके प्रकाशिते सत्त्वानामारोग्यकौशल्यमेवमेव तिमिरे बुद्धक्षेत्रे सर्व्वद्वीपेषु चेद्यं रूपः पुरुषकारः कृतः सत्त्वाश्च स्वर्गपथे प्रतिष्ठापिता देवनागयक्षमनुष्या ऋषयः सन्निपातिताः येस्सत्त्वानामपीप विविधा विद्यास्थानाः प्रकाशिताः यथेह तिमिरे बुद्धक्षेत्रे एवमेव दशसु दिक्षु गङ्गानदीवालिकासमेषु पञ्चकषायेषु बुद्धक्षेत्रेष्वेवंरूपः पुरुषकारः कृतः सत्त्वाश्च त्रिषु यानेषु नियोजिताः स्वर्गपथे च प्रतिष्ठापिता विविधाश्च विद्यास्थानालोको प्रकाशिताः सत्त्वा व्याधितः परिमोचिता अनुत्तरा च मे कुलपुत्रैवं रूपा आशा परिपूर्णाः । यदि तत्र तिमिरे बुद्धक्षेत्रे सर्व्वद्वीपेष्वेवं रूपः पुरुषकारः कृतो यथा प्रणिधानं कृतं । अप्रतुलरेण यानेन दशसु दिक्षु गङ्गानदीवालिकासमेषु शून्येषु पञ्चकषायेषु बुद्धक्षेत्रेष्वेकैकस्मिन् बुद्धक्षेत्रे सर्व्वद्वीपेष्वेवंरूपः पुरुषकारः कृतो यथा मे पूर्व्वप्रणिधानं कृतं । पश्य कुलपुत्र अप्राविशेषं बोधिचर्यायां अयं च तथागतस्य अपायां सुचरितानां कुशलमूलवीजं । तथा मत्यवरकालसमयेऽसंख्येयैः कल्पैरधिकतरैरन्तरेणेदं बुद्धक्षेत्रं विचितदीपं नामाऽभूत् । संशयमे महाकल्पे वर्त्तमाने तदपि पञ्चकषायं पुरिमायान्दिशानुपश्याशायां चातुर्द्वीपिकायां वर्त्तमानं जंबूद्वीपमभूत् तत्राप्यहं सत्त्वपरिपाचनार्थमुपपन्नः चतुर्द्वीपेश्वरः चक्रवर्ती राजा अम्बरो नाम बभूव । तत्र च मया सत्त्वा दशसु कुशलेषु कर्मपथेषु समादापिता निवेशिताः प्रतिष्ठापिता स्त्रिषु यानेषु समादापिता निवेशिताः प्रतिष्ठापिताः सर्व्वदश्च बभूव सर्व्वप्रदायी तत्र च मे याचनका आगत्वा विविधानि रत्नानि याचन्ति । तद्यथा हिरण्यसुवर्णं यावदिन्द्रनीलमहानीलज्योतीरसोदकप्रसादकाभियाचनकानान्तावत्प्रभूतानि रत्नानि लभ्यन्ते । तदाहमाभ्यां पृष्टवान् कुत एषां रत्नानां प्रादुर्भावः त आहुः । नागराजानो निधीन्निर्दर्शयन्ति निधीनां लोके प्रादुर्भावो रत्नानां प्रादुर्भावो भवति । न केवलन्तावत्का निर्दर्शयन्ति यावत्का देवमायाचनकाः तदाहं प्रणिधानमकरोत् । यदाहं पञ्चकषाये लोके वर्त्तमाने तीव्रसंरम्भे कलियुगे वर्त्तमाने वर्णताप्युष्कायां प्रजायामनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं । तदिय मे आशापरिपूर्णन्तु यदस्मिन् बुद्धक्षेत्रे निधिदर्शी नाम नागराजा भवेयं । सर्व्वत्र चास्मिं विशिष्टद्वीपे बुद्धक्षेत्रे सर्व्वद्वीपेषु च एकैकस्मिन् द्वीपे सप्तजन्मानि परिगृह्णीयां । एकैकस्मिंश्च जन्मनि निधिकोटीनयुतशतसहस्राणि दर्शयेयं । ययक्षीर्पं च नानारत्नपरिपूर्णानि । तद्यथा

हिरण्यसुवर्णं यावदिन्द्रनीलमहानीलज्योतीरसोदकप्रभासाथ । एकैकश्च निधियोजनसहस्राणि [illegible] विस्तरेण परिपूर्णमपि रत्नं सत्वानां निःशेषेण प्रयच्छेयम् यदसौ शुद्धमेवैकं दुष्करं कुर्याम् । एवमेव एतासु दिशु गङ्गानदीवालिकासमेषु बुद्धक्षेत्रेषु पञ्चकषायेषु लोकधातुषु एकैकस्मिन् द्वीपे सर्वत्र द्वीपे सप्तजन्मानि प्रतिष्ठापयेयं यावत्सर्वा पूर्णाः स्युः । यदा च मे [illegible] प्रणिधानं कृतं । तदा गगनतले देवकोटीनियुतशतसहस्रैरन्तरीक्षे पुष्पवृष्टि [illegible] साधुकारशब्दश्च । साधु साधु सर्वज्ञ सुष्ठु [illegible] ते एवंरूपा श्रद्धा यया ते प्रणिधानं कृतं । [illegible] । शाक्याऽस्माकं देवैर्गगनतलगतैः सर्वज्ञ इति नाम कृतं [illegible] । यदुक्तं त्वया दुष्करपरित्यागं दानं [illegible] । यदि [illegible] सर्वज्ञ इति नाम भविष्यति । [illegible] । [illegible] राज्ञोऽस्माकमान्तःपुरिको [illegible] । [illegible] पुत्रदुहितृणां [illegible] । तदा राजाऽस्माकं प्रयच्छति [illegible] । न चेदं पुत्रं वा भार्यां परित्यजति यदुक्तं त्वया राज्ञोऽस्माकं [illegible] । [illegible] सर्वज्ञो भविष्यति ।

[illegible] न सर्वज्ञो भविष्यति । [illegible] नाम [illegible] सर्वज्ञ [illegible] राज्ञा [illegible] प्रतिपा- [illegible] । [illegible]

सर्व्वशरीरस्नेहाङ्गप्रत्यङ्गानि परित्यजता एकक्षणमपि न विप्रतिसारिकृतं चित्तं न च मे रोष उत्पादितवेन मे आशा परिपूर्य्यन्तु अयं मे कायो मांसपर्व्वतः सन्तिष्ठतां । ये केचित्सत्त्वा मांसार्थिका रुधिरार्थिकास्ते मांसमश्नन्तु यावन्तो मे सत्त्वा मांसमश्नीयुः रुधिरं च पिबेयु-स्तावन्मे प्रणिधानवशेन शरीरं वर्धतु । अनुपूर्व्वेण यावद्योजनशतसहस्रमुच्चत्वेन कायः सम्भवतु । पञ्चयोजनसहस्रं विस्तारेण । तत्र मया वर्षसहस्रं मांसरुधिरेण सत्त्वाः सन्तर्पिता यावन्तश्च मया जिह्वाः परित्यक्ता या मृगपक्षिभिः परिभुक्ताः प्रणिधानवशेन यावन्त्यः प्रादुर्भूताः तेषामहं दृढमूलपर्व्वतसमानो राशिः [illegible] चानुत्तरा प्रभूतजिह्वता लक्षण-प्रतिलाभाय मे प्रणिधानं कृतं । तथाहं च्युत्वा रत्नवन्ते जम्बुद्वीपे पूर्व्वप्रणिधानेन नागकुलोपपन्नो निधिसन्दर्शनो नाम नागराजा अभूवं । यामेव रात्रिं नागकुलोपपन्नस्तामेव रात्रिं निधि-कोटीनयुतशतसहस्राणि निधानानां सन्दर्शितानि अयमेव घोषं चारयामि । भोः सत्त्वा अस्मिन्प्रदेशे निधिः प्रादुर्भूतः नानारत्नपरिपूर्णस्तथा हिरण्यसुवर्णः यावदुदकप्रमाणं यूयं यथाभिप्रायं गृहीत्वा भोः सत्त्वा दशकुशलान् कर्म्मपथान् समादाय वर्त्तध्वं । अनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयत । श्रावकयानेन वा बुद्धयानेन वा चित्तमुत्पादयत एतत्र रत्नानि धारयध्वं । तत्र च रत्नवन्ते जम्बुद्वीपे सप्तनागजन्मपरिवर्त्तनसहस्राणि [illegible] कोटीनयुतशतसह-स्रमात्रया महीया निधयो निदर्शितास्तच्च तथाप्रमेया मनुष्याः [illegible] दशसु कुशलेषु कर्म्मपथेषु निवेशिता नानाविधैः रत्नैः सन्तर्पिता अनुत्तरायां [illegible]-प्रतिलाभाय प्रणिधानं कृतं । एवं द्वितीये द्वीपे सप्तनागजन्मपरिवर्त्तसहस्रं [illegible] कृतवान् । एवं तृतीये यावत्सर्व्वत्र विजितदीपायां लोकधातौ सर्व्वेषु द्वीपेषु [illegible] पुरुषकारः कृतः । एवमेव दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु बुद्धक्षेत्रेषु [illegible]-संज्ञेषु । एकैकस्मिं द्वीपे एवं एवाः सप्तनागजन्मपरिवर्त्तेषु मया [illegible] [illegible] [illegible]

[illegible]

[illegible] प्रतिष्ठापिताः । यथा च [illegible] ।

अयं मे कुलपुत्र [illegible] दानपारमिता बोधिचर्यायाश्चरमाणस्य [illegible] गम्भीरां क्षान्तिं गम्भीरां धारणीं । गम्भीरं समाधिं । यदा लौकिकाभिज्ञाः प्रतिलब्धाः एवंरूपं महापुरुषकारं कृतवान् एवमप्रमेयासंख्येयाः सत्त्वा अनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिता. एवमप्रमेयासंख्येयाः सत्त्वाः प्रत्येकबुद्धयाने एवमप्रमेयासंख्येयाः सत्त्वाः श्रावकयाने समादापिता निवेशिताः प्रतिष्ठापिताः । स्थापयित्वा यावन्तो मया बोधिसत्त्वचर्यायाश्चरमाणेन बुद्धक्षेत्रपरमाणुरजःसमा मे बुद्धा भगवन्तः पर्युपासिताः । एकैकस्य बुद्धस्यान्तिके सागरोदकबिन्दुप्रमाणा मया गुणाः परिगृहीताः गणनातिक्रान्तानां प्रत्येकबुद्धानां मया पूजा कृता गणनातिक्रान्तानां तथागतश्रावकाणां पूजा कृता । एवं मातापितॄणां पञ्चाभिज्ञानामृषीणां पूजा कृता । मया च कृपया पूर्वे बोधिसत्त्वचर्यां चरमाणेन समांसरुधिरेण सत्त्वाः सन्तर्पिता इदानीमपि धर्म्मेण सन्तर्पिताः ॥

इति श्रीकरुणापुण्डरीके महायानसूत्रे दानपरिवर्त्तो नाम पञ्चमः ॥

यथाहं कुलपुत्र बुद्धचक्षुषा पश्यामि दशसु दिक्षु बुद्धक्षेत्रपरमाणुरजःसमान् बुद्धान् भगवतः परिनिर्वृतान् ये मया प्रथममनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिताः ये मया दानपारमितायां प्रथमं समादापिता यावत् प्रज्ञापारमितायां समादापिता निवेशिताः प्रतिष्ठापिताः । एवमेवैतर्हि पूर्वस्यां दिशि अप्रमेया संख्येयास्ते बुद्धा भगवन्तः प्रवर्त्तितधार्म्मिकधर्म्मचक्राः तिष्ठन्तो यापयन्तो धर्म्मं देशयन्तोऽद्यात्वं । ये मया प्रथममनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादिता निवेशिताः प्रतिष्ठापिताः एवं यावत् षट्सु पारमितासु

वक्तव्य एवं दक्षिणे पश्चिमोत्तरे ऽधोर्ध्वेषु दिक्षु वक्तव्यं । पश्याम्यहं कुलपुत्र पुरिमे दिग्-
भागे इतो बुद्धक्षेत्रादेकनवतिबुद्धक्षेत्रशतसहस्राण्यतिक्रम्य संपुष्पिते लोकधातौ विमलतेज-
पुष्पराजो नाम तथागतस्तिष्ठति ध्रियते यापयति धर्म्मञ्च देशयति यथा स भगवान्
पूर्वं प्रथममनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितः समादापितो निवेशितः प्रतिष्ठापितः ।
तथा दानपारमितायां यावत्प्रज्ञापारमितायां प्रथमं समादापितः पेयालं पुरिमायां दिशि अ-
भिरतौ बुद्धक्षेत्रे अक्षोभ्यो नाम तथागतो जंबूनदे बुद्धक्षेत्रे सूर्यगर्भो नाम तथागतः रत्नोच्चये
बुद्धक्षेत्रे रत्नाकरज्वालितनाम तथागतः सूर्यप्रतिष्ठिते बुद्धक्षेत्रे ज्ञानभास्करो नाम तथा-
गतः उपद्रवणे बुद्धक्षेत्रे नागाभिनन्दितो नाम तथागतः मल्लोपने बुद्धक्षेत्रे वज्रधारितिनाम
तथागतः अरजे बुद्धक्षेत्रे व्याघ्रशिखिनाम तथागतः अरतौपे बुद्धक्षेत्रे सूर्यगर्भो नाम तथा-
गतः । वैरगमे बुद्धक्षेत्रे कोशीश्वरराजो नाम तथागतः शंकमे बुद्धक्षेत्रे अचिन्त्यराजो नाम
तथागतः मन्दरे बुद्धक्षेत्रे ज्योतिर्ध्वजनाम तथागतः कुसुमगर्भे बुद्धक्षेत्रे नागकेतुर्नाम
तथागतः । विमोक्षते बुद्धक्षेत्रे शंखस्वरगन्धर्वश्रेष्ठिनाम तथागतः धर्मारण्ये बुद्धक्षेत्रे
ज्ञानविख्यातो नाम तथागतः ॥ कुसुमविचित्रे बुद्धक्षेत्रे विमलनेत्रो नाम तथागतः । एतां
पूर्व्वस्यां कृत्वा कुलपुत्र पुरिमायां दिशासंख्येयान् बुद्धान् भगवतः तिष्ठतो याप-
यतो धर्म्मं देशयतो बुद्धचक्षुषा पश्यामि । येनानुत्पादितबोधिचित्ताः पूर्व्वमनुत्तरायां सम्यक्-
सम्बोधौ समादापिता यथा च प्रथमं दानपारमितायां यावत्प्रज्ञापारमितायां समादा-
पिताः प्रतिष्ठापिता यथा च प्रथमं तिष्ठतो यापयतो बुद्धान् भगवतो यथापूर्व्वोक्तान
तत्र सर्व्वमहं व्याकरणं प्रतिलब्धं अनुत्तरायां सम्यक्सम्बोधौ ।

अथ तस्यां वेलायां संपुष्पितायां लोकधातौ तस्य विमलतेजःपुष्पराजस्य तथागतस्या-
सनं प्रकम्पितं । ये तत्र बोधिसत्त्वास्ते तस्य विमलतेजःपुष्पराजस्य तथागतस्यासनं प्रकम्पितं
दृष्ट्वा तस्य तथागतं पृच्छन्ति को भगवन् हेतुः कः प्रत्ययो यदिदं ते भगवत
आसनं प्रकम्पितमिति । स तथागतस्तानवोचत् अस्ति कुलपुत्राः पश्चिमायां दिशि इतो
बुद्धक्षेत्रादेकनवतिबुद्धक्षेत्रशतसहस्राण्यतिक्रम्य तत्र सहायां लोकधातौ शाक्यमुनिर्नाम तथा-
गतस्तिष्ठति ध्रियते यापयति । स एतर्हि चतसृणां पर्षदां पुरस्तात् धर्म्मं देशयति ।
तेन तथागतेन पूर्वं बोधिसत्त्वभूतेनानुत्तरायां सम्यक्सम्बोधौ समादापित इह मे प्रथम-
मनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितं तेन तथागतेनाहं प्रथमं दानपारमितायां समादा-
पितो निवेशितः प्रतिष्ठापितः प्रज्ञापारमितायां तेन तथागतेन [illegible]
[illegible] प्रथमं तिष्ठतो यापयतो बुद्धान् भगवतो यथापूर्व्वोक्तान् [illegible]
प्रतिलब्धमनुत्तरायां सम्यक्सम्बोधौ । स च मे [illegible]
[illegible] तिष्ठति यापयति स एवं चतसृणां पर्षदां [illegible]
[illegible] तथागतो [illegible] । [illegible]
[illegible]
[illegible]
[illegible]

स्तेनागं मुहूर्त्तपूर्णिमोचालः पुष्पवृष्टिश्च । ते च बोधिसत्त्वा आहुः वयमपि भदन्त भगवन्निष्यामस्तं महं बुद्धक्षेत्रं तं शाक्यमुनिं वन्दनाय पर्युपासनाय तं च सर्वतथागतकारण्डव्यूहगोमुखप्रदेशं धर्म्मपर्य्यायं श्रवणाय । ते बहुबोधिसत्त्वशतसहस्राः स्वेनर्द्ध्यनुभावेन ततो बुद्धक्षेत्रात्सम्प्रस्थिताः तेनावगच्छन्ति क्व गन्तव्यं । तेऽप्याहुः तामपि वयं भदन्त भगवन्दिशं न जानीमो यत्र महालोकधातुः शाक्यमुनेस्तथागतस्य बुद्धक्षेत्रं । ततः सविमलतेजराजस्तथागतो बाहुं प्रसार्य्य पञ्चभ्योऽङ्गुलिभ्यो विविधान्यर्च्चींषि प्रमुमोच । ततस्तान्यर्च्चींषि एकोननवतिबुद्धक्षेत्रसहस्राण्यवभासितवान् । यावच्चेमं महं बुद्धक्षेत्रमवभासितवान् । यतस्ते बोधिसत्त्वाः पश्यन्ति सर्व्वाविदिमं महं बुद्धक्षेत्रं स्फुटं बोधिसत्त्वैर्गगनतले च देव-नाग-यक्षासुरैः स्फुटं । दृष्ट्वा च पुनस्ते बोसत्त्वास्तं विमलगुणतेजराजानं तथागतमेवमाहुः । पश्यामो वयं भदन्त भगवन् महं बुद्धक्षेत्रं । सर्व्वावन्तं स्फुटं नास्ति तत्रावकाशोऽन्तशो दण्डनिक्षेपमात्रमपि । यत्र स्फुटं बोधिसत्त्वैः पश्यामः शाक्यमुनिस्तथागतोऽस्मान्निरीक्षते धर्म्मं च देशयति । स च विमलगुणतेजराजस्तथागतस्तेषां बोधिसत्त्वानामेवमाह । समन्तचक्षुः कुलपुत्राः शाक्यमुनिस्तथा ये केचित् कुलपुत्रा महे लोकधातौ सत्त्वा भूमिस्थिता वा अन्तरीक्षस्थिता वा । ततश्चैकैकः सत्त्व एवं संजानाति मां शाक्यमुनिस्तथागतः सर्व्वचेतसा निरीक्षते ममैकमारभ्य धर्म्मं देशयति । सर्व्ववर्णैश्च स कुलपुत्र शाक्यमुनिस्तथागतो धर्म्मं देशयति । एकवर्णस्थानं ये च तत्र कुलपुत्र सत्त्वा ब्राह्मभक्तास्ते शाक्यमुनिं तथागतं ब्रह्माणं समनुपश्यन्ति महाब्रह्मपरिविहारेण धर्म्मं शृण्वन्ति । यावद् ये मारभक्तिका ये सूर्य्यभक्तिका ये चन्द्रभक्तिका ये वैश्रवणभक्तिका ये विरूढकभक्तिका ये धृतराष्ट्रभक्तिका ये महेश्वरभक्तिकास्ते सत्त्वा महेश्वररूपवर्णसंस्थानवचनव्याहारेण शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति । यावच्चतुरशीतिस्तत्र सत्त्वानां वर्णं संस्कारभक्तिरूपव्याहारसहस्राणि ते तथा चैव शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति । तस्यां च पर्षदि हयगर्जितो नाम बोधिसत्त्वो द्वितीयश्च ज्योतिरश्मिर्नाम बोधिसत्त्वः ॥

अथ विमलगुणतेजराजस्तथागतस्तान् बोधिसत्त्वानामन्त्रयति स्म गच्छथ यूयं कुलपुत्राः महे लोकधातौ शाक्यमुनिं तथागतं मद्वचनादारोग्यकौशल्यं सुखस्पर्शविहारतां परिपृच्छथ । ते बोधिसत्त्वा आहुः सर्व्वावन्तं भगवन् महं बुद्धक्षेत्रं स क्षितिगगनं बोधिसत्त्वैः स्फुटं समनुपश्यामः । न चात्रैकसत्त्वस्याप्यवकाशोऽस्ति क्षितौ गगने वा यत्र वयं प्रतितिष्ठेमः । स च विमले गुणतेजराजस्तथागत आह । मा कुलपुत्रा एवं वदथ नास्ति महे बुद्धक्षेत्रेऽवकाशः विस्तीर्णावकाशः स शाक्यमुनिस्तथागतोऽचिन्त्यैर्बुद्धगुणैः पूर्वप्रणिधानेन विस्तीर्णा तथागतस्य कृपाशासनावतारप्रवेशा त्रिशरणगमनं त्रियानधर्म्मदेशनामारभ्य धर्म्मं देशयति । त्रिविधं वः शिक्षासम्वरं देशयति त्रीणि च विमोक्षद्वाराण्युपदर्शयति त्रिभ्योऽपायेभ्यः सत्त्वानुद्धरति तिसृषु च शिवेषु पथेषु प्रतिष्ठापयति । एकस्मिन्समये कुलपुत्र शाक्यमुनिस्तथागतो चिराभिसम्बुद्धो वैनेयसत्त्वावेक्षया मध्ये शैलपर्वते इन्द्रशैलस्य पर्वतस्य भवने शालगुहायां विहरति स्म सप्ताहमेकपर्य्यङ्केनातिनामयति विमुक्तिप्रीतिसुखं प्रतिसंवेदयति सर्व्वावती च सा शालगुहा तथागतकायेन स्फुटा नास्ति तत्रावकाशोऽन्तशश्चतुरङ्गुल-

प्रकाशं [illegible]नादि च भूतं । तत्र च शाक्यमुनिना दशभिर्दिग्भिर्द्वादशनयुता बोधिसत्त्वानां तत्र सर्वे लोकधातौ यस्मात् पर्वतस्याभिमुखं स्थित्वा शाक्यमुनेस्तथागतस्य [illegible] धर्मश्रवणाय । स च [illegible] शाक्यमुनिस्तथागतस्तत्र पर्षदि [illegible] संस्थितवान् सा च शालगुहा । एवं विस्तीर्णा चैवं विपुला च प्रादुर्भूता यदा ते द्वादशनयुता बोधिसत्त्वानां तत्र शालगुहायां प्रविष्टा विस्तीर्णावकाशं पश्यन्ति स्म । एकैकस्य बोधिसत्त्वस्य तथागतस्य विविधबोधिसत्त्वविकुर्वितेन पूजां कृत्वा एकैको बोधिसत्त्वस्तत्र महारत्नपद्मासनं निर्मितवान् यत्रोपविष्टा धर्मं शृण्वन्ति स्म । एवं विस्तीर्णावकाशः [illegible] स शाक्यमुनिस्तथागतः ते च बोधिसत्त्वाः तस्य शाक्यमुनेस्तथागतस्य सकाशाद्धर्मं श्रुत्वा शाक्यमुनेस्तथागतस्य पादौ शिरसा वन्दित्वा त्रिस्कृत्वः प्रदक्षिणीकृत्य स्वकस्वकेषु बुद्धक्षेत्रेषु [illegible] प्रक्रान्तानां च तेषां बोधिसत्त्वानां शालगुहा यथा पौराणा संस्थिता तत्र चतुर्द्वीपिकायां कौशिको नाम शक्र आयुःपरिक्षीणस्तिर्यग्योन्युपपत्तिभयभीतः स चतुरशीतिभिस्त्रयस्त्रिंशद्देवपुत्रैः सार्द्धं येन शालगुहा येन च भगवांस्तेनोपसंक्रामति । उपसंक्रम्य सामन्ततो [illegible] शालगुहाभवने स्थितः तथा भगवताऽनुभावेन [illegible] यन्नूनं वयमपि पञ्चशिखं गन्धर्वपुत्रमध्येषेम । स च पञ्चशिखो मधुरेण स्वरेण भगवन्तमभिमुखं स्तविष्यति । तदा भगवान् ध्यानसमाधिभ्यो व्युत्थास्यति । ततः शक्रः पञ्चशिखं गन्धर्वपुत्रमधीष्टवान् ।

अथ पञ्चशिखो वीणां मनोज्ञेन गीतवादित्रेण भगवतोऽनुभावेन पञ्चभिस्तवशतैर्भगवन्तं वर्णमभाषत । यदा च कुलपुत्र पञ्चशिख आरब्धो भगवतोऽभिस्तवनाय ततः स शाक्यमुनिर्भगवान् सुघोषवैरोचनकेतुं नाम समाधिं समापन्नस्तेन समाधिना ये सर्वे लोकधातौ महर्द्धिकयक्ष-राक्षसा वासुरा वा गरुडा वा किन्नरा वा महोरगा वा गन्धर्वाः सर्वे कामावचरा देवाः सर्वे रूपावचरा देवपुत्रास्तत्र सन्निपाता बभूवुः ये च स्वरभक्तिकास्ते स्वरं श्रुत्वा प्रसीदन्ति । ये वर्णयशोभक्तिकास्ते भगवतो वर्णं श्रुत्वा तस्य भगवतः सकाशे तीव्रप्रेमप्रसादगुरुगौरवचित्रीकारजाताः प्रसीदन्ति ये वेणुवाद्यभक्तिकास्ते वेणुवाद्यं श्रुत्वा प्रसीदन्ति ततः शाक्यमुनिर्भगवांस्ततः समाधेर्व्युत्थाय शालगुहाया द्वारं दर्शयामास शक्रश्चोपसंक्रान्तो भगवन्तं पृष्टवान् भगवान् कुत्रोपविशाम्यहं स शाक्यमुनिस्तथागत उवाच । निषीद त्वं यस्मा यावन्तस्तु समागताः ततः साले गुहा एवं विस्तीर्णा संस्थिता यथा द्वादशगङ्गानदी-वालिकासमा यदास्तत्र गुहायां प्रविष्टा निषण्णायाश्च तस्याः पर्षदः स शाक्यमुनिस्तथागतो धर्मदेशनां कृतवान् यथा ये तस्मिन् पर्षदि श्रावकयानिका निषण्णास्ते श्रावकयानकथां शृण्वन्ति । नवनवतिकोट्यस्तत्र स्रोतापत्तिफलं प्राप्ताः ये च तत्र पर्षदि अनुत्तरसम्यक्सम्बुद्धयानिकास्ते शुद्धां महायानकथां शृण्वन्ति । तत्र च पञ्चशिखगन्धर्वपर्षद्गमा अष्टादशनयुता अवैवर्त्तिकाः संस्थिता अनुत्तरायां सम्यक्सम्बोधौ येन तथामुत्पादितं त्रिषु यानेषु चित्तं तत्र कैश्चिदनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितं कैश्चित्तत्र प्रत्येकबुद्धयाने चित्तमुत्पादितं कैश्चिच्छ्रावकयाने चित्तमुत्पादितं स च तत्र कौशिकः शक्रो भयात्परिमुक्तो वर्षकल्पं चायुर्विवृद्धं । अवैवर्त्तिकानुत्तरायां सम्यक्सम्बोधौ बभूव तदेवं विस्तीर्णावकाशः

कुलपुत्र स शाक्यमुनिस्तथागतः एवं विस्तीर्णं चास्य तथागतस्य स्वरमण्डलं । न शक्यं केन चित्तस्य तथागतस्य स्वरमण्डलस्य पर्यन्तमुद्ग्रहीतुं वा गणयितुं वा विस्तीर्णं तस्य तथागतस्योपायकौशल्यं सत्त्वपरिपाकाय न शक्यं तस्य तथागतस्योपायकौशल्यस्य पर्यन्तमुद्ग्रहीतुं विस्तीर्णकायश्च कुलपुत्र तथागतो न शक्यं केनचित्तस्य मूर्द्धानमवलोकयितुं कायस्य वा पर्यन्तमधिगन्तुं । यावन्तश्च सत्त्वा एतर्हि तत्र सहे बुद्धक्षेत्रे सन्निपतिता यदि ते सत्त्वाः शाक्यमुनेस्तथागतस्य कुक्षौ प्रविशेयुस्ते सर्वे तत्र विचरेयुस्ते च सत्त्वास्तस्य तथागतस्यैकरोमकूपे प्रविशेयुः निष्क्रमेयुश्च ते एकरोमकूपात्तस्य तथागतस्य नो शक्ताः पर्यन्तमुद्ग्रहीतुं कतरस्मा पूर्वान्तस्मान्निष्क्रान्तो दिव्येनापि चक्षुषा तथैवं विस्तीर्णकायः स शाक्यमुनिस्तथागतः । पुनरपरं कुलपुत्र विस्तीर्णबुद्धक्षेत्रः स शाक्यमुनिस्तथागतो यावन्तश्च दशसु दिक्षु गङ्गा-नदी-वालिकासमा बुद्धक्षेत्रा एवं परिपूर्णा भवेयुः । सत्त्वैस्तावन्त्यपि नामैतर्हि सहं बुद्धक्षेत्रं सर्वे ते सत्त्वा एतर्हि सहे बुद्धक्षेत्रे विशेयुः सर्वे ते तत्र विचरेयुः तत्कस्माद्धेतोरनेन तस्य तथागतस्य पूर्वं प्रथमचित्तोत्पादेनानुत्तरायां सम्यक्सम्बोधौ प्रणिधानं कृतम् । [illegible] कुलपुत्रेमे गङ्गा-नदी-वालिकासमा लोकधातवः स चेत् कुलपुत्र यावन्तश्च दिक्षु सर्वा गङ्गा-नदी-वालिकासमा बुद्धक्षेत्रा एवं विस्तीर्णाः तथ्यमेतर्हि सहबुद्धं परिपूर्णं सत्त्वैः ते सर्वे एतर्हि सहे लोकधातौ प्रविशेयुस्ते सर्वे तत्र विचरेयुरेवं कृतं । तस्य तथागतस्य पूर्वं [illegible] प्रतिलम्भाय प्रणिधानं कृतम् । एवं विस्तीर्णबुद्धक्षेत्रः स कुलपुत्र शाक्यमुनिस्तथागतः । अभिश्च धर्मविशिष्टतरः स शाक्यमुनिस्तथागतो यथादृष्टैते [illegible] इमां चन्द्रोत्तरविमलां पुष्पाकूटस्य पश्चिमां दिशं यथा स्वयं दृष्ट्वा [illegible] तं शाक्यमुनिं तथागतमारोग्यकौशल्यं पृच्छत ॥ स च विमलगुणतेजश्रा- [illegible] पुष्पां [illegible] अधिमात्रया आतिरोहित अधि[illegible] [illegible] सर्वाधिमात्राभासेन सहो लोकधातु । तत्र विंशतिः प्राणि[illegible] [illegible] भगवन् [illegible] तथानुभावेन सहो लोकधातुं तथा शाक्यमुनिस्तथा- [illegible] विमलगुणतेजप्रा[illegible] प्राह । [illegible] [illegible] अधिमात्रया आतिरोहित [illegible] विंशतिर्भिक्षो- [illegible] तथागतस्य [illegible] संपूजितास्ता [illegible]

[illegible]

एवमभिरम्या बुद्धक्षेत्रात् अक्षोभ्यस्य तथागतस्यासनं कम्पति ये च तत्र बोधिसत्त्वाः सन्निपतितास्ते चापि दृष्ट्वाक्षोभ्यस्य तथागतस्यासनं कम्पितं परिपृच्छन्ति स्म । पेयालं यथा पूर्वोक्तं सर्वेषामेवं वक्तव्यं । तेन च समयेनाप्रमेयासंख्येयाः पुरिमायां दिशि तथागता दूता बोधिसत्त्वा इमं सहं बुद्धक्षेत्रं सह चन्द्रोत्तरविमलैः सम्प्राप्ताः शाक्यमुनेस्तथागतस्य परिपृच्छनाय पूजनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । समनन्तरपरिवर्त्तितो भगवतः पुरिमायां दिशि बुद्धक्षेत्रनामपरिकीर्त्तनं बुद्धानां भगवतां । दक्षिणां दिशं पुनर्भगवानारब्धः परिकीर्त्तयितुं । यस्मादहं कुलपुत्र दक्षिणस्यान्दिशीतो बुद्धक्षेत्रादेकगङ्गा-नदीवालिकासमानि बुद्धक्षेत्राण्यतिक्रम्य तत्र सर्वशोकापगतो नाम लोकधातुस्तत्राशोकश्रीर्नाम तथागतस्तिष्ठति ध्रियते यापयति । यथा स भगवान् सर्वप्रथमं पूर्वबोधिसत्त्वचारिकां चरमाणेनानुत्तरायां सम्यक्सम्बोधौ यावद्यथापूर्वोक्तं जम्बुध्वजे बुद्धक्षेत्रे धर्मेश्वरविनर्द्दितोनाम तथागतः सेरुप्रतिष्ठिते बुद्धक्षेत्रे गतीश्वरमालेन्द्रोनाम तथागतः गुणेन्द्रनिर्यूहे बुद्धक्षेत्रे सिंहविजृम्भितराजा नाम तथागतः । मणिमूलकूटे बुद्धक्षेत्रे नागयक्षविजितगर्भो नाम तथागतः । मुक्ताप्रभसत्त्वे बुद्धक्षेत्रे रत्नगुणविजृम्भितपाणी नाम तथागतः देवगर्भे बुद्धक्षेत्रे ज्योतिगर्भो नाम तथागतः चन्दनकूले बुद्धक्षेत्रे सर्वार्थप्रधानकीर्त्तिर्नाम तथागतः विशिष्टगन्धे बुद्धक्षेत्रे पुष्पवलमालराजा नाम तथागतः सुविशिष्टे बुद्धक्षेत्रे मनोज्ञघोषस्वरविनर्द्दितो नाम तथागतः सुरक्षे बुद्धक्षेत्रे सालजयविन्द्रराजा नाम तथागतः सर्वलोके बुद्धक्षेत्रे तेजेश्वरप्रभासो नाम तथागतः अभिराजितबुद्धक्षेत्रे गुणनोदास्वरनिर्घोषो नाम तथागतः । रत्नविभवे बुद्धक्षेत्रे रत्नतलनागेन्द्रो नाम तथागतः धरणाग्रजवाहने बुद्धक्षेत्रे धर्ममेघनिर्घोषेश्वरकोष्ठो नाम तथागतः पेयालं यथापूर्वोक्तं । [illegible] बुद्धानां भगवतां दक्षिणस्यान्दिश्यासनानि कम्पन्ति । सर्वे[illegible] भगवन्तः शाक्यमुनेस्तथागतस्य वर्णं यशःकीर्त्तिमुदीरयन्ति । यावत्तेन समयेनाप्रमेयासंख्येया दक्षिणस्यान्दिशि तथागतदूता बोधिसत्त्वाः सह चन्द्रोत्तरविमलैः पूर्ववदिमं सहं बुद्धक्षेत्रमनुप्राप्ताः शाक्यमुनेस्तथागतस्य पृच्छनाय यावद्धर्मश्रवणाय ।

पुनरपि भगवानाह ॥ यस्मादहं कुलपुत्र पश्चिमायां दिशीतो बुद्धक्षेत्रान् [illegible] बुद्धक्षेत्रनयुतशतसहस्राण्यतिक्रम्य तत्र [illegible] नाम बुद्धक्षेत्रं [illegible] नाम तथागतस्तिष्ठति ध्रियते यापयति धर्मञ्च देशयति यथा स भगवान् पूर्वं बोधिसत्त्व[illegible] चर्यां चरमाणेन सर्वप्रथमं [illegible] यावद्यथापूर्वोक्तं । [illegible]
कोशो नाम तथागतः [illegible] नाम तथागतः [illegible]
[illegible]
एवमप्रमेयासंख्येयानां पश्चिमायां [illegible] बुद्धानां भगवतां [illegible] शाक्यमुनेस्तथागतस्य [illegible]
परिकीर्त्तितानि तथागतासनानि कम्पन्ते । [illegible]
दिशि तथागतदूता बोधिसत्त्वाः सह चन्द्रोत्तरविमलैः [illegible]
[illegible] धर्मश्रवणाय । [illegible]
[illegible]

[illegible]

पश्चाम्यहं कुलपुत्रोत्तरपश्चिमायां दिशीतो बुद्धक्षेत्रादष्टानवतिबुद्धक्षेत्रकोटीनयुतशतसहस्राण्यतिक्रम्य तत्र विजयं नाम बुद्धक्षेत्रं विगतसन्तापोद्भववैश्रमणसालराजो नाम तथागतः । पूर्वं बोधिसत्त्वभूतेन बोधिसत्त्वचर्य्यां चरमाणेन सर्वप्रथममनुत्तरायां सम्यक्सम्बोधौ समादापितो यावत्षट्सु पारमितासु यावन्मयासर्वप्रथमं तिष्ठतां यापयतां बुद्धानां भगवतां सकाशमुपरी(नी)ते । यत्र तेन व्याकरणं प्रतिलब्धमनुत्तरायां सम्यक्सम्बोधौ यदा नाम परिकीर्तितं तदासनं कम्पितं यावच्चतुरशीतिसत्त्वानां वर्णभक्तिसंस्थानरूपव्याहारसहस्राणि तथा शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति तत्र च पर्षदि द्वौ बोधिसत्त्वौ एकः विशोपशिखरो नाम द्वितीयः संरोचनबुद्धो नाम स च विगतसन्तापोद्भववैश्रमणशालराजो नाम तथागतस्तौ द्वौ बोधिसत्त्वौ आमन्त्रयित्वैवमाह । गच्छतं युवां कुलपुत्रौ सहे बुद्धक्षेत्रे मद्वचनाच्छाक्यमुनेस्तथागतस्यारोग्यकौशल्यं सुखस्पर्शविहारतां परिपृच्छतां तावाहतुः सर्वावन्तं भदन्त भगवन्तानां* सहं बुद्धक्षेत्रं स क्षितिगगनं समनुपश्यामः न च तत्रैकसत्त्वस्याप्यवकाशोऽस्ति क्षितौ वा गगने वा यत्रावां प्रतिष्ठेवहि स च तथागत आह ॥ स कुलपुत्रैवं वदत नास्ति सहे बुद्धक्षेत्रेऽनवकाशः तत्कस्माद्धेतो विस्तीर्णावकाशः कुलपुत्रौ स शाक्यमुनिस्तथागतोऽचिन्त्यैर्बुद्धगुणैः पूर्वप्रणिधानेन विस्तीर्णा तस्य तथागतस्य कृपाशासनावतारप्रवेशः त्रिशरणगमनं त्रिभिर्यानैर्धर्म्मं देशयति त्रिविधं शिक्षासम्वरं देशयति त्रीणि विमोक्षद्वाराणि प्रकाशयति त्रिभ्यश्चापायेभ्यः सत्त्वानुद्धरति त्रिषु च शिवपथेषु सत्त्वान् प्रतिष्ठापयति । एकस्मिं समये कुलपुत्र स शाक्यमुनिस्तथागतोऽचिराभिसम्बुद्धो वैनेयसत्त्वावेक्षया विषमे शैलेन्द्रपर्वतमध्ये इन्द्रस्तस्य यक्षस्य भवने सालगुहायां विहरति स्म सप्ताहमेकपर्य्यङ्केनातिनामयति स्म । विमुक्तिप्रीतिसुखसंवेदी । सर्व्वावती च सा सालगुहा स्फुटा तथागतकायेन नास्ति तत्रावकाशोऽन्तशश्चतुरङ्गुलप्रमाणं यन्न तथागतकायेन स्फुटं तस्य च सप्ताहस्यात्ययेन दशभ्यो दिग्भ्यः । द्वादशनयुता बोधिसत्त्वानां महासत्त्वानां सहे लोकधातौ सम्प्राप्तास्तस्य शाक्यमुनेस्तथागतस्य वन्दनाय यावदिमैश्चतुर्भिर्धर्मैं विशिष्टतरः ।

स शाक्यमुनिस्तथागतो यथान्ये तथागता एह्यौध्वं यूयं कुलपुत्रा इमां चन्द्रोत्तविमलां पुष्पां गृहीत्वा गच्छत पश्चिमां दिशं यथा स्वयं दृष्ट्वा तं बुद्धक्षेत्रं मम वचनात्तस्य शाक्यमुनेस्तथागतस्यारोग्यकौशल्यं पृच्छत । स च विगतसन्तापोद्भववैश्रमणसालराजस्तथागतः पुष्पां गृहीत्वा विशोपशिखरस्य बोधिसत्त्वस्य ददाति संरोचनबुद्धस्य च बोधिसत्त्वस्य महासत्त्वस्य । एवं चाह । गच्छत कुलपुत्रौ समर्द्धिबलाधानेन सहं बुद्धक्षेत्रं तत्र विंशतिप्राणसहस्राण्याहुः । वयमपि भगवन् गमिष्यामस्तथागतस्यानुभावेन सहं बुद्धक्षेत्रं शाक्यमुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय । तथागत आह । गच्छत कुलपुत्रा यथाभिप्रायाः । ततस्तौ द्वौ बोधिसत्त्वौ सार्द्धं विंशतिभिर्बोधिसत्त्वसहस्रैस्तस्य तथागतस्य रि(ऋद्ध)ध्यनुभावेन† ततो विजयाद्‡ बुद्धक्षेत्रात् सम्प्रस्थिताः एकक्षणेनेह बुद्धक्षेत्रेऽनुप्राप्ता गृध्रकूटे पर्व्वते प्रत्यस्थुः । एकान्तस्थिताश्च येन शाक्यमुनिस्तथागतस्तेनाञ्जलिं प्रणम्याहुः ।

---

* भगवतामिति पाठः साधुः । † ऋद्ध्यनुभावेन इति पाठः साधुः । ‡ विजयाद् इति पाठ साधुः ।

यदा च मया कृतं प्रणिधानं क्षुभितास्त्रयो लोकाः कम्पिता धरणी चलितो मेरुः रुदन्ति देवगणास्ततोऽहमात्मानं शैलात्पर्यन्तोत्पातयामास ॥ प्रणिधानवशेन मम पर्व्वत-प्रमाण आत्मभावः संवृत्तः । योजनशतं विस्तारेण योजनमुच्चत्वेन ॥ यावन्मनुष्यसगणपक्षिणः आरब्धा मांसरुधिरं भक्षयितुं । मम च कुलपुत्र सकायः सत्त्वैः परिभुज्यमानः प्रतिदिनं वर्द्धते योजनशतसहस्रं विस्तारेण संवृत्तः । योजनसहस्रमुच्चत्वेन सर्व्वत्र मानुषशिरा प्रादुर्भूता सयोभ्रकर्णनयननासौष्ठदन्ताः सजिह्वा अनेकमुखशतसहस्राः प्रादुर्भूताः ते च मुखा मनुष्य-शब्देन घोषयन्ति । भोः सत्त्वा भो गृह्णीय येनार्थमान् सम्परिभुङ्क्ष्व । रुधिरं पिबथ नयनानि गृह्णीय कर्णनासां योष्ठदन्तजिह्वां गृह्णीय । यस्यार्थं येनार्थं यावदर्थं सर्पितशरीराः परिपूर्णाभिप्राया अनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयथ । श्रावकयानेन वा प्रत्येकबुद्धयानेन वा । अयं युष्माकमुपभोगपरिभोगो न क्षीयते न च युष्माकं अश्राद्धेयं भविष्यति मात्रः । विप्रमोक्ष जीवितक्षयो भवतु । ये च तत्र विज्ञाः सत्त्वा स्ते केचिच्छ्रावकयाने चित्तमुत्पादयन्ति केचित्प्रत्येकबुद्धयाने केचिदनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादयन्ति । केचित् पुनर्देवमनुष्योपपत्तौ चित्तान्युत्पादयन्ति । मांसमश्नयन्ति रुधिरं पिबन्ति । केचिन्नयनानि गृह्णन्ति केचित्कर्णौ केचिन्नासां केचिदोष्ठौ केचिद्दन्तां गृह्णन्ति गृहीत्वा प्रक्रामन्ति प्रणिधानवशेन यानीयं प्रादुर्भवति मांसं न क्षानो भवति न परिक्षयं गच्छति । यावद्दशवर्षसहस्राणि सर्व्वं जम्बुद्वीपका मनुष्या यक्षाद्गणपक्षिणोऽपि स्वशरीरेण सन्तर्पयामास तेषां दशभिर्वर्षसहस्रैर्गङ्गा-नदी-वालिकासमानि मया नेत्राणि परित्यक्तानि । चतुःमहासमुद्रोदकप्रमाणं मया रुधिरं परित्यक्तं । सुमेरुसहस्रप्रमाणं मया मांसं परित्यक्तं । चक्रवाडपर्व्वतप्रमाणं मया जिह्वा परित्यक्ता गृध्र-कूटप्रमाणा मया कर्णाः परित्यक्ता विपुल सुमेरुप्रमाणा मया नासाः परित्यक्ता । एवं गृध्रकूटपर्व्वतप्रमाणा मया दन्ताः परित्यक्ताः । कृत्स्नं सर्वं [illegible] स्वसर्वं परित्यक्तं यत्र कुलपुत्र दशवर्षसहस्राणि [illegible] परितर्पिताः [illegible] [illegible]

स्वमांसरुधिरचर्म्मनयनकर्णनासोष्ठजिह्वाद्यैः सन्तर्पयित्वा त्रिषु यानेषु समादापयेयं मनुष्या यक्षराक्षसां सर्व्वतिर्य्यग्योनिकाये केचिन्मांसरुधिरभोजनाहाराः पृथग्यक्षा यावदन्तशः । मांसलौकिका तांश्चाहं सन्तर्पयेयं । यथा चाहमेकस्मिं बुद्धक्षेत्रे स्वशरीरेण सर्व्वसत्त्वां सन्तर्पयेयं । एवमेव समन्ताद्दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु बुद्धक्षेत्रेषु स्वमांसरुधिरचर्म्मनयना यावज्जिह्वाभिरेवं रूपेणात्मभावेन गङ्गा-नदी-वालिकासमान्महाकल्पान्तेषु तेषु बुद्धक्षेत्रेषु स्वकायजीवितेन सत्त्वां सन्तर्पयेयं । एवंरूपमात्मभावं प्रतिलभ्य विषमवादिता ये बुद्धा भगवन्तो भवेयु ये दशसु दिक्ष्वन्येषु बुद्धक्षेत्रेषु प्रवर्त्तितधर्म्मचक्राः तिष्ठन्ति यापयन्ति धर्म्मं च देशयन्ति*। माहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं मा चाहं संसारे संसरमाणो बुद्धशब्दं शृणुयां मा च धर्म्मशब्दं मा सङ्घशब्दं मा पारमिताशब्दं मा मारबलपराजयशब्दं मा वैशारद्यशब्दं यावत्कुशलशब्दमपि संसारे मा शृणुयां नित्यञ्चावीचौ नरके सम्भवेयं यदि मे एवं रूपः स्वशरीरपरित्यागः सत्त्वसन्तर्पणार्थेन समृद्ध्यते नैवं रूपं च मे प्रणिधानं परिपूरिं स्याद्यथा मे आशा चिन्तिता । येऽपि चेमस्मिन् बुद्धक्षेत्रे सर्व्वत्र द्वीपेष्वेकैकस्मिं द्वीप एवं रूपा आत्मभावाः परित्यक्ताः सत्त्वाश्च मांसरुधिरेण सन्तर्पिता एवं दशसु दिक्षु गङ्गा-नदी-वालिकासमेष्वन्येषु बुद्धक्षेत्रेषु सत्त्वा एवंरूपेणात्मभावेन स्वमांसरुधिरेण सन्तर्पिताः । यथा कुलपुत्रस्य तथागतस्य दानपारमिता आत्मभावपरित्यागं ये यथानुप्रवर्त्तेन तत्काले तेषां परित्यक्ताः तेषां पुनरयं जम्बूद्वीपे यावत्त्रयस्त्रिंशद्देवपर्यन्तप्रमाणो राशिर्भवेत् ।

अयं कुलपुत्र तथागतस्य संक्षिप्तेन आत्मपरित्यागदानपारमिता । पुनरपरं कुलपुत्र ततः पश्चादप्रमेयानां कल्पानामत्ययेन अयं बुद्धक्षेत्रमन्द्रविद्युतो नाम बभूव । अहं तस्मिं जम्बूद्वीपे राजा बभूव । महोपाध्यातो नाम बलवांश्चक्रवर्त्ती एवं च मया सकलजम्बूद्वीपकाः सत्त्वाः कुशलेषु नियोजिता यथापूर्व्वोक्तं । यथाऽहमुद्यानभूमिं निर्यातः स्वमृगदर्शनाय तत्र चाहं पुरुषमद्राक्षं । पश्चाद्बाहुबद्धमपनयनं वध्यमानं दृष्ट्वा मयामात्याः पृष्टाः किमनेन पुरुषेण कृतं अमात्या मां प्रत्यूचुरयं पुरुषो देवस्य सापराधिकाय देवस्य पुरुषस्य [illegible] यस्य चोत्पद्यते । ततो देवस्य षट्कांशो देयः । यथान्ये कुटुम्बिनो ददत्यायद्वारं । ये देवस्य नगरग्रामे जनपदकर्वटेषु प्रतिवसन्ति कर्म्मान्तेन जीविकां कल्पयन्ति । तं चैष पुरुषो न ददाति । तानद्यैतदर्थं । ततो मयोक्तं एवं पुरुषं मा कस्यचिद्बलात्कारेणाग्रं गृह्णीत ये यापयन्ति देव न कश्चित्पुरुषप्रवृत्तिको ददाति यदि यस्य [illegible] परिभोगो देवानां देवस्य योऽन्तःपुरे देवस्य पुत्राणां दुहितॄणां [illegible] परिभोगाः सर्व्वं तत्परः सकाशाद्दुहितॄणां । न च कोशस्थाः प्रपश्यति । ततोऽहं परमदुर्मनाश्चिन्तयामि [illegible] सर्व्वं जम्बूद्वीपे राज्यैश्वर्य्यं ददामि । मम [illegible] समादापयित्वा [illegible] जम्बूद्वीपे पञ्चाशत्कानि कृत्वा पुत्राणां प्रदत्तं । अहं च तदा गत्वा [illegible] प्रविवेश । [illegible] चतुरशीतिवर्षसहस्राणि [illegible] । [illegible] जम्बूद्वीपकानां [illegible] ।

तच्च चिन्तामणिं गृहीत्वा सम्प्रस्थितः ततः क्षुभितः समुद्रनागा आकुला रुदन्ति देवतायास्तत्र निर्देशिनास्तत्र चाश्वक्षो नाम ऋषिर्बोधिसत्त्वः पूर्वप्रणिधानेन तत्रोपपन्नः तेन महासत्त्वेन स सार्थः स्वस्तिना क्षेमेण च महासमुद्रादुत्तारितस्तस्य च सार्थवाहस्यान्यतरो दुष्टो राक्षसः प्रत्यर्थिकोऽवतारप्रेक्षी विवरगवेषी पृष्ठतः पृष्ठतः समनुबद्धः तेन सप्तदिवसानि परमकलुषा वातवृष्टिरवसृष्टा यतस्ते वणिजः प्रनष्टमार्गाः परमभीता उच्चस्वरेण रुदन्ति क्रन्दन्ति परिदेवन्ति देवन्ति वा याचन्ति। शिववरुणा यावन्मातापितरमाक्रन्दति प्रियपुत्रा यावदश्वर्षिर्दिव्येन श्रोत्रेण यावत्तत्रागत्वा वणिजः समाश्वासितः समागतोऽस्माभायः अहं युष्माकं मार्गमुपदर्शयिष्यामि यावज्जम्बूद्वीपं स्वस्तिना क्षेमेण च प्राप्स्यथ तदाहमस्ततैलेन म्रक्षयित्वा स्वहस्तं वेष्ट्य अग्निना प्रज्वाल्य सत्यवचनमकरोत्। यदि मया षड्विंशद्वर्षाचतुर्भिर्ब्राह्मैर्विहारैर्वनषण्डनिवासिनां सत्त्वानामर्थाय हिताय नवमूलफलाहारेण चतुरशीतीनां नागयक्षसहस्राणां चित्तसन्ततिः परिपाचिता अवैवर्त्तिकाश्च स्थापिता अनुत्तरायां सम्यक्सम्बोधौ तेन सत्येन सत्यं वचनेन कुशलमूलपरिपाकेन ज्वलतु मे हस्तं लभन्तु मार्गं वणिजः स्वस्तिना क्षेमेण जम्बूद्वीपं प्रापयन्तु। यावत्सप्तरात्रिदिवसाः स्वहस्तं ज्वलितवान्। ते वणिजो जम्बूद्वीपे स्थापितास्तत्र मया प्रणिधानं कृतं यदा जम्बूद्वीपं रत्नपरिहीणं भवेत्। तदाहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं। तदा इयं मे आशा परिपूर्यतु। सार्थवाहो भवेयं जम्बूद्वीपे सप्तवारां चिन्तामणिमानयित्वा विविधं रत्नवर्षमभिप्रवर्षयं। यावत्सर्वद्वीपेष्वस्मिं बुद्धक्षेत्रे एवमेव दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु शून्येषु बुद्धक्षेत्रेषु पञ्चकषायेषु रत्नं प्रवर्षयेयं यावत्पूर्वोक्तमेवं च मे आशापरिपूर्णानां गङ्गा-नदीवालिकासमानां महाकल्पानामन्तरेण सार्थवाहोऽभूवम् गङ्गा नदी-वालिकासमेषु शून्येषु पञ्चकषायेषु बुद्धक्षेत्रेषु रत्नानि प्रवर्षितानि। एकैकद्वीपे सप्तवारां विविधं रत्नवर्षं प्रवर्षितं एवमप्रमेया सङ्ख्येयाः सत्त्वा रत्नैः परिपूर्णाभिप्रायाः कृतास्त्रिषु च यानेषु नियोजिताः यस्य कुलपुत्र तथागतस्य रत्नपरित्यागलक्षणं विपाककुशलमूलं। पुनरपरं कुलपुत्राप्रमेयाणां कल्पानामत्ययेनान्तरेणायं बुद्धक्षेत्रस्तिमिननामाभूत् सन्तारणे कल्पे वर्त्तमाने पञ्चकषाये पञ्चवर्षशताहिकायां प्रजायां प्रणिधानेनाहमस्मिं जम्बूद्वीपे सूर्यमालगन्धो नाम ब्राह्मणोऽभूवम् वेदपाठकः तत्कालं च सत्त्वा भूयसा शाश्वतदृष्टयोऽभूवन् सत्त्वेरपराक्रमाः सकलहाधिष्ठानाः तेषां चाहं महाबलवीर्यपराक्रमेण सत्त्वानां शरणभूतं स्कन्धपर्यायेन धर्मं देशयामि शून्यग्रामायतनप्रत्ययेक्षणाप्रत्ययसमनुयुक्तं सोत्साहनायं आनापारस्मृतिमनस्कारं दर्शयामि। तेऽनुत्तरायां सम्यक्सम्बोधौ चित्तोत्पादे न कुशलमूले परिणामनाभियोजिताः स्वर्गे च चाहं प्रस्थापित संवृतः तेन च समयेनाप्रमेया सङ्ख्येयाः सत्त्वा ममान्तिकाद्धर्मश्रवणेन एवाभिज्ञाः संवृत्ता एवमप्रमेया सङ्ख्येयाः [illegible] [illegible] मूलफलाहारा [illegible] [illegible]। तत [illegible] कल्पे यदा निर्वाणाय [illegible] [illegible]। [illegible] [illegible]। [illegible] [illegible]

लोकपालां अन्ये च देवा ऋषयो वा मनुष्यपर्षद्य सन्निपातयेयं भैषज्योपकरणशास्त्रं सत्त्वानां
हितार्थमुपदर्शयेयं तदहमुक्त्वा गत्वा शक्रब्रह्मलोकपाल देवर्षीणां नागर्षीणां मनुष्यर्षीणां
मारो एक विद्रूपतिर्नाम पर्वतः तत्र सन्निपातयित्वा विद्युच्चरकमूर्धनि नामध्यानं भूत-
सन्निवारणप्रतिशरणं रक्तवातपित्तश्लेष्मसमभ्यादनशास्त्रं निर्देशयेयं । पेयालं । अप्रमेयासंख्ये-
यानां सत्त्वानां व्याधिप्रशमनं कृतं तत्र महाप्रणिधानं कृतं यथा सप्तैकदिवसेऽप्रमेयासंख्येयानां
सत्त्वानां महावभासः कृतः त्रिषु च यानेषु नियोजिता अपायपथाः पिथिताः स्वर्गपथप्रति-
ष्ठापिता विविधाश्च व्याधयः प्रशमिताः परिमोचिताश्च । एवमप्रमेयाणामसंख्येयानां सत्त्वानां
महालोको दत्तः सौख्ये च स्थापिताः । तदनेन कुलपुत्र कुशलमूलविपाकेन इयं मे प्रणिधा-
नाशाःपरिपूर्णाः यदा च मयैकदिवसेऽप्रमेयाणामसंख्येयानां सत्त्वानामपायपथा निरोधिताः
स्वर्गपथे च प्रतिष्ठापिता ग्लानप्रत्ययाभ्यकरणार्थं देवर्षियक्षसङ्घाः सन्निपातिताः सत्त्वानाम-
र्थाय विद्युच्चरमूर्धनि देवलोके प्रकाशिते सत्त्वानामारोग्यकौशल्यमेवमेव तिमिरे बुद्धक्षेत्रे
सर्व्वद्वीपेषु चेदं मयः पुरुषकारः कृतः सत्त्वाश्च स्वर्गपथे प्रतिष्ठापिता देवनागयक्षमनुष्या
ऋषयः सन्निपातिताः येस्सत्त्वानामर्थाय विविधा विद्याख्यानाः प्रकाशिताः यथेह तिमिरे
बुद्धक्षेत्रे एवमेव दशसु दिक्षु गङ्गानदीवालिकासमेषु पञ्चकषायेषु बुद्धक्षेत्रेष्वेवं मयः पुरुषकारः
कृतः सत्त्वाश्च त्रिषु यानेषु नियोजिताः स्वर्गपथे च प्रतिष्ठापिता विविधाश्च विद्याख्यानालोको
प्रकाशिताः सत्त्वा व्याधितः परिमोचिता अनुत्तरा च मे कुलपुत्रैवं मया आशा परिपूर्णाः ।
अपि तत्र तिमिरे बुद्धक्षेत्रे सर्व्वद्वीपेष्वेवं मयः पुरुषकारः कृतो यथा प्रणिधानं कृतं । अन-
नुत्तरेण ध्यानेन दशसु दिक्षु गङ्गानदीवालिकासमेषु शून्येषु पञ्चकषायेषु बुद्धक्षेत्रेष्वेकैकस्मिन्
बुद्धक्षेत्रे सर्व्वद्वीपेष्वेवं मयः पुरुषकारः कृतो यथा मे पूर्व्वप्रणिधानं कृतं । पश्य कुलपुत्र प्रज्ञा-
विशेषं बोधिचर्यायां अयं च तथागतस्य प्रथमं सुचरितानां कुशलमूलबीजं । तथा सत्यव-
रकालसमयेऽसंख्येयैः कल्पैरधिकतरैरन्तरेणेदं बुद्धक्षेत्रं विचितदोषं नामाऽभूत् । संक्षयते महा-
कल्पे वर्त्तमाने तदपि पञ्चकषायं पुरिमायान्दिश्यनुपश्यागतायां चातुर्द्वीपिकायां वर्त्तमानं जंबू-
द्वीपमभूत् तत्राप्यहं सत्त्वपरिपाचनार्थमुपपन्नः चतुर्द्वीपेश्वरः चक्रवर्त्ती राजा अम्बरो नाम
बभूव । तत्र च मया सत्त्वा दशसु कुशलेषु कर्मपथेषु समादापिता निवेशिताः प्रतिष्ठापिता
स्त्रिषु यानेषु समादापिता निवेशिताः प्रतिष्ठापिताः सर्व्वदश्च बभूव सर्व्वप्रदायी तत्र च मे
याचनका आगत्वा विविधानि रत्नानि याचन्ति । तद्यथा हिरण्यसुवर्णं यावदिन्द्रनीलमहा-
नीलज्योतीरसोदकप्रसादकाभियाचनकानान्तावत्प्रभूतानि रत्नानि लभ्यन्ते । तदाहमाभ्यां
पुण्यवान् कुत एषां रत्नानां प्रादुर्भावः त आहुः । नागराजानो निधीन्निदर्शयन्ति निधीनां
लोके प्रादुर्भावो रत्नानां प्रादुर्भावो भवति । न केवलन्तावत्का निर्दिशन्ति यावत्का देवता-
याचनकाः तदाहं प्रणिधानमकरात् । यदाहं पञ्चकषाये लोके वर्त्तमाने तीव्रसंक्लेशे कलियुगे
वर्त्तमाने वर्णगताधुष्कायां प्रजायामनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्येयं । तदिह मे आशा-
परिपूर्णन्तु यदन्तर्गासन्न बुद्धक्षेत्रे निधिदर्शी नाम नागराजा भवेयं । सर्व्वत्र चास्मिं
विजितधीगे बुद्धक्षेत्रे सर्व्वद्वीपेषु च एकैकस्मिन् द्वीपे सप्तजन्मानि परिगृह्णीयां । एकैकस्मिंश्च
जन्मनि निधिकोटीनयुतशतसहस्राणि दर्शयेयं । प्रयच्छेयं च नानारत्नपरिदृष्टानि । तद्यथा

हिरण्यसुवर्णं यावदिन्द्रनीलमहानीलज्योतीरसोदकप्रसादाश्च। एकैकश्च निधियोजनसहस्राणि कृत्वा विस्तरेण परिपूर्णमपि रत्नं सत्त्वानां निर्दोषेयं प्रयच्छेयेयं यदि सर्वं शक्नोमि एवंरूपं दुष्करं कुर्याम्। एवमेव दशसु दिक्षु गङ्गानदीवालिकासमेषु बुद्धक्षेत्रेषु पञ्चकषायेषु लोकधातुषु एकैकस्मिन् क्षेत्रे सर्वेषु द्वीपेषु सप्तजन्मानि प्रतिष्ठापयेयं यावत्प्रणिधानं पूर्णं स्यात्। यथा च मे कल्याणपूर्वेयं रूपं प्रणिधानं कृतं। तदा गगनतले देवकोटीनयुतशतसहस्राणि तावत्पुष्पवृष्टि प्रवर्षित्वा साधुकारमनुप्रददुः। साधु साधु सर्वन्दद अनुज्ञानामि ते एवंरूपा आशा यथा ते प्रणिधानं कृतं। सर्वलोकधातुजनकायः। राज्याऽस्मात्पा देवैर्गगनतलगतैः सर्वन्दद इति नाम कृतं यत्ता शीघ्रमेवाभवत्। यद्भूनं त्वं दुष्करपरित्यागं ज्ञानं यास्यसि। यदि ... सर्वन्दद इति नाम भविष्यति। ... सर्वाः। ... राज्ञोऽस्मात् ... दद्यात् ... पुत्रदुहितृणां पालितुं। तदा राजाम्बरः प्रयच्छति प्रव्रजि... न वेदं दुष्करं वा भार्यां परित्यजति यद्भूनं त्वं राज्ञोऽस्मात् ... सर्वन्दद भविष्यति।

[illegible]

सर्व्वशरीरस्नेहाङ्गप्रत्यङ्गानि परित्यजता एकक्षणमपि न विप्रतिसारिकृतं चित्तं न च मे रोष उत्पादितस्तेन मे आशा परिपूर्य्यन्तु अयं मे कायो मांसपर्व्वतः सन्तिष्ठतां । ये केचित्सत्त्वा मांसाहारा रुधिरपातारस्ते मांसम्भक्षयन्तु यावन्तो मे सत्त्वा मांसम्भक्षयेयुः रुधिरं च पिबेयु-स्तावन्मेप्रणिधानवशेन शरीरं वर्धतु । अनुपूर्व्वेण यावद्योजनशतसहस्रमुच्चत्वेन कायः सम्भवतु । पञ्चयोजनसहस्रं विस्तारेण । तत्र मया वर्षसहस्रं स्वमांसरुधिरेण सत्त्वाः सन्तर्पिता यावन्तश्च मया जिह्वाः परित्यक्ता या ब्रह्मचारिभिः परिभुक्ताः प्रणिधानवशेनैवान्यान्याः प्रादुर्भूताः तेषामपि स्वप्रकृतपर्व्वतसमता राशिः स्यादियं चानुत्तरा प्रभूतजिह्वता लक्षण-प्रतिलाभाय मे प्रणिधानं कृतं । तथाहं भूत्वा इहैव जम्बुद्वीपे पूर्व्वप्रकाशकेन नागकुल-पद्मो निधिसन्दर्शनो नाम नागराजा बभूव । यामेव रात्रिं नागकुलपद्मेनाहमेव रात्रिं निधि-कोटीनयुतशतसहस्राणि निधानानां सन्दर्शितानि स्वयमेव घोषं घोषयामि । भोः सत्त्वा अस्मिन्प्रदेशे निधिः प्रादुर्भूतः नानारत्नपरिपूर्णभाजना हिरण्यसुवर्णः यावदुदकप्रमाणस्य गृह्णं गृह्य ग्रहीत्वा भोः सत्त्वा दशकुशलान् कर्मपथान् समादाय वर्तध्वं । अनुत्तरायां सम्यक्सं-बोधौ चित्तमुत्पादयत । श्रावकयानेन वा बुद्धयानेन वा चित्तमुत्पादयत एवञ्च सर्व्वान् पालयध्वं । तत्र च इहैव जम्बुद्वीपे सप्तनागजन्मपरिवर्तेनसप्तवर्षकोटीनयुतशतसहस्रा-ण्यनेकया ऋद्ध्या निधयो निदर्शितास्त एवं तथागतया ऋद्ध्या सत्त्वा[illegible] दशसु कुशलेषु कर्मपथेषु निवेशिता नानाविधैश्च रत्नैः सन्तर्पिता अनुत्तरा[illegible]-प्रतिलाभाय प्रणिधानं कृतं । एवं द्वितीये द्वीपे सप्तभिर्नागजन्मपरिवर्त्तैरेवं पुरुषकारं कृतवान् । एवं तृतीये यावत्सर्व्वम् विजिततद्यावत् लोकधातौ सर्व्वेषु द्वीपेषु एवंविधः पुरुषकारः कृतः । एवमेव दशसु दिक्षु गङ्गा-नदी-वालिकासमेषु बुद्धेषु पञ्चकषायेषु क्षेत्र-वर्त्तेषु । एकैकस्मिं द्वीपे एवं सप्त सप्तनागजन्मपरिवर्तेषु मया सप्तसप्तवर्षकोटीनयुत-शतसहस्रैरप्रमेयया ऋद्ध्या निधयः सत्त्वानां दर्शिता यावदनुत्तरायां [illegible] बोधिचर्यायां यथा तथागतकोटीनयुतैः [illegible] पोषितवान् यथा पूर्वं मे बोधिसत्त्वा एवंरूपां लोकधातोर्मेरु [illegible] [illegible]

[illegible]

अयं मे कुलपुत्र [illegible] दानपारमिता बोधिचर्य्याश्चरमाणस्य तथा [illegible] गम्भीरां क्षान्तिं गम्भीरां धारणीं। गम्भीरं समाधिं। यदा लौकिकाभिज्ञाः प्रतिलब्धाः एवंरूपं महापुरुषकारं कृतवान् एवमप्रमेयासंख्येयाः सत्त्वा अनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिता. एवमप्रमेयासंख्येयाः सत्त्वाः प्रत्येकबुद्धयाने एवमप्रमेयासंख्येयाः सत्त्वाः श्रावकयाने समादापिता निवेशिताः प्रतिष्ठापिताः। स्थापयित्वा यावन्तो मया बोधिसत्त्वचर्य्यायाश्चरमाणेन बुद्धक्षेत्रपरमाणुरजःसमा मे बुद्धा भगवन्तः पर्युपासिताः। एकैकस्य बुद्धस्यान्तिके सागरोदकबिन्दुप्रमाणा मया गुणाः परिगृहीताः गणनातिक्रान्तानां प्रत्येकबुद्धानां मया पूजा कृता गणनातिक्रान्तानां तथागतश्रावकाणां पूजा कृता। एवं मातापितॄणां पञ्चाभिज्ञानामृषीणां पूजा कृता। मया च कृपया पूर्वं बोधिसत्त्वचर्य्यां चरमाणेन समांसरुधिरेण सत्त्वाः सन्तर्पिता इदानीमपि धर्म्मेण सन्तर्पिताः॥

इति श्रीकरुणापुण्डरीके महायानसूत्रे दानपरिवर्त्तो नाम पञ्चमः ॥

यथाहं कुलपुत्र बुद्धचक्षुषा पश्यामि दशसु दिक्षु बुद्धक्षेत्ररमाणुरजःसमान् बुद्धान् भगवतः परिनिर्वृतान् ये मया प्रथममनुत्तरायां सम्यक्सम्बोधौ समादापिता निवेशिताः प्रतिष्ठापिताः ये मया दानपारमितायां प्रथमं समादापिता यावत् प्रज्ञापारमितायां समादापिता निवेशिताः प्रतिष्ठापिताः। एवमेवैतर्हि पूर्वस्यान्दिशि अप्रमेया संख्येयास्ते बुद्धा भगवन्तः प्रवर्त्तितधार्म्मिकधर्म्मचक्राः तिष्ठन्तो यापयन्तो धर्म्मं देशयन्तोऽद्यात्वे। ये मया प्रथममनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादिता निवेशिताः प्रतिष्ठापिताः एवं यावत् षट्सु पारमितासु

वक्तव्य एवं दक्षिणे पश्चिमोत्तरे ऊर्ध्वोपरिषु दिक्षु वक्तव्यं। पश्याम्यहं कुलपुत्र पुरिमे दिग्-भागे इतो बुद्धक्षेत्रादेकनवतिबुद्धक्षेत्रशतसहस्राण्यतिक्रम्य संपुष्पिते लोकधातौ विमलतेज-पुष्पराजो नाम तथागतस्तिष्ठति ध्रियते यापयति धर्मञ्च देशयति यथा च भगवान् पूर्वं प्रथममनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितः समादापितो निवेशितः प्रतिष्ठापितः। तथा दानपारमितायां यावत्प्रज्ञापारमितायां प्रथमं समादापितः पेयालं पुरिमायान्दिशि अ-भिरते बुद्धक्षेत्रे अक्षोभ्यो नाम तथागतो जंबूनदे बुद्धक्षेत्रे सूर्यगर्भो नाम तथागतः रत्नोद्धरे बुद्धक्षेत्रे रत्नार्च्चिर्ज्वालिर्नाम तथागतः सूर्यप्रतिष्ठिते बुद्धक्षेत्रे ज्ञानभास्करो नाम तथा-गतः जयध्वजे बुद्धक्षेत्रे नागाभिनर्दितो नाम तथागतः मञ्जीरघोषे बुद्धक्षेत्रे वज्रधारिर्नाम तथागतः रत्ने बुद्धक्षेत्रे व्याघ्ररश्मिर्नाम तथागतः प्ररतीये बुद्धक्षेत्रे सूर्यगर्भो नाम तथा-गतः। वैरम्भे बुद्धक्षेत्रे कोशीश्वरराजो नाम तथागतः गन्धप्रभे बुद्धक्षेत्रे अचिन्त्यराजो नाम तथागतः सम्बरे बुद्धक्षेत्रे ज्योतिर्ध्यानिर्नाम तथागतः कुसुमप्रभे बुद्धक्षेत्रे प्रभाकेतुर्नाम तथागतः। विमोक्षे बुद्धक्षेत्रे गन्धस्वरप्रदर्शनघोषनाम तथागतः धरणाग्रयां बुद्धक्षेत्रे ज्ञानश्रियो नाम तथागतः॥ कुसुमविचित्रे बुद्धक्षेत्रे विमलनेत्रो नाम तथागतः। एतां पूर्वाङ्गुल्यां कृत्वा कुलपुत्र पूर्वस्यां दिशि अप्रमेयासंख्येयान् बुद्धान् भगवतः तिष्ठतो याप-यतो धर्मं देशयतो बुद्धचक्षुषा पश्यामि। यैनानुत्पादितबोधिचित्ताः पूर्वमनुत्तरायां सम्यक्-सम्बोधौ समादापिता मया च प्रथमं दानपारमितायां यावत्प्रज्ञापारमितायां समादा-पिताः प्रतिष्ठापिता मया च प्रथमं तिष्ठतो यापयतो बुद्धानां भगवतो यथाभूतप्रवर्तितो तत्र सर्वप्रथमं व्याकरणं प्रतिलब्धं अनुत्तरायां सम्यक्सम्बोधौ।

अथ तस्यां वेलायां संपुष्पितायां लोकधातौ तत्र विमलतेजःपुष्पराजस्य तथागतस्या-सनं प्रकम्पितं। ये तत्र बोधिसत्त्वास्ते तस्य विमलतेजःपुष्पराजस्य तथागतस्यासनं प्रकम्पितं दृष्ट्वा तं च तथागतं पृच्छन्ति को भगवन् भगवतो हेतुः कः प्रत्ययो यदिदं ते बुद्धासनं भगवन् प्रकम्पितमिति। स तथागतस्तानवोचत् अस्ति कुलपुत्राः पश्चिमे दिग्भागे इतो बुद्धक्षेत्रादेकोननवतिबुद्धक्षेत्रशतान्यतिक्रम्य तत्र सहायां लोकधातौ शाक्यमुनिर्नाम तथा-गतस्तिष्ठति ध्रियते यापयति। स एतर्हि चतुर्णां पर्षदां पूर्वयामपरमो धर्मं देशयति। तेन तथागतेन पूर्वं बोधिसत्त्वभूतेनानुत्तरायां सम्यक्सम्बोधौ समादापित अहं च प्रथमं अनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितं तेन तथागतेनाहं प्रथमं दानपारमितायां समादा-पितो निवेशितो प्रतिष्ठापितो यावत्प्रज्ञापारमितायां तेन तथागतेन [illegible] अहं प्रथमं तिष्ठतो यापयतो बुद्धानां भगवतो यथाभूतप्रवर्तितो यत्र च [illegible] प्रतिलब्ध[illegible] अनुत्तरायां सम्यक्सम्बोधौ। स च मे शाक्यमुनिस्तथागतः [illegible] [illegible] तिष्ठति यापयति स एतर्हि चतुर्णां पर्षदां [illegible] तेन तथागतेनाहं [illegible] [illegible] [illegible] [illegible] [illegible]

स्तेनाग्रं मुहूर्त्तपुरिगच्छोचालः पुष्पवृष्टिश्च । ते च बोधिसत्त्वा आहुः वयमपि भदन्त भगवन्निष्यामस्तं सहं बुद्धक्षेत्रं तं शाक्यमुनिं वन्दनाय पर्युपासनाय तं च सर्व्वतथागतकायशाखी-मुखप्रदेशं धर्म्मपर्य्यायं श्रवणाय । ते बहुबोधिसत्त्वशतसहस्राः स्वेनर्द्ध्यनुभावेन ततो बुद्धक्षेत्रात्सम्प्रस्थिताः तेनावगच्छन्ति क्व गन्तव्यं । तेऽप्याहुः तामपि वयं भदन्त भगवन्निदिशं न जानीमो यत्र सहालोकधातुः शाक्यमुनेस्तथागतस्य बुद्धक्षेत्रं । ततः सविमलतेजराजस्तथागतो बाहूं प्रसार्य्य पञ्चभ्योऽङ्गुलिभ्यो विविधानर्च्चीष्यपि प्रमुमोच । ततस्तार्च्चीष्यपि एकोननवतिबुद्धक्षेत्रसहस्राण्यवभासितवान् । यावच्चेमं सहं बुद्धक्षेत्रमवभासितवान् । यतस्ते बोधिसत्त्वाः पश्यन्ति सर्व्वावदिमं सहं बुद्धक्षेत्रं स्फुटं बोधिसत्त्वैर्गगनतले च देव-नाग-यक्षासुरैः स्फुटं । दृष्ट्वा च पुनस्ते बोसत्त्वास्तं विमलगुणतेजराजानं तथागतमेवमाहुः । पश्यामो वयं भदन्त भगवन् सहं बुद्धक्षेत्रं । सर्व्वावन्तं स्फुटं नास्ति तत्रावकाशोऽन्तशो दण्डनिक्षेपमात्रमपि । यत्र स्फुटां बोधिसत्त्वैः पश्यामः शाक्यमुनिस्तथागतोऽस्माद्भिरीक्षते धर्म्मं च देशयति । स च विमलगुणतेजराजस्तथागतस्तेषां बोधिसत्त्वानामेवमाह । समन्तचक्षुः कुलपुत्राः शाक्यमुनिस्तथा ये केचित् कुलपुत्रा सहे लोकधातौ सत्त्वा भूमिस्थिता वा अन्तरीक्षस्थिता वा । ततश्चैकैकः सत्त्व एवं संजानाति मां शाक्यमुनिस्तथागतः सर्व्वचेतसा निरीक्षते ममैकमारभ्य धर्म्मं देशयति । सर्व्ववर्णश्च स कुलपुत्र शाक्यमुनिस्तथागतो धर्म्मं देशयति । एकवर्णस्थानं ये च तत्र कुलपुत्र सत्त्वा ब्राह्मभक्तास्ते शाक्यमुनिं तथागतं ब्रह्माणं समनुपश्यन्ति महाब्रह्मपरिविहारेण धर्म्मं शृण्वन्ति । यावद् ये मारभक्तिका ये सूर्य्यभक्तिका ये चन्द्रभक्तिका ये वैश्रवणभक्तिका ये विरूढकभक्तिका ये धृतराष्ट्रभक्तिका ये महेश्वरभक्तिकास्ते सत्त्वा महेश्वररूपवर्णसंस्थानवचनव्याहारेण शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति । यावच्चतुरशीतिस्तत्र सत्त्वानां वर्णं संस्कारभक्तिरूपव्याहारसहस्राणि ते तथा चैव शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति । तस्यां च पर्षदि हयगर्जितो नाम बोधिसत्त्वो द्वितीयश्च ज्योतिरश्मिर्नाम बोधिसत्त्वः ॥

अथ विमलगुणतेजराजस्तथागतस्तान् बोधिसत्त्वानामंत्रयति स्म गच्छथ यूयं कुलपुत्राः सहे लोकधातौ शाक्यमुनिं तथागतं मद्वचनादारोग्यकौशल्यं सुखस्पर्शविहारतां परिपृच्छथ । ते बोधिसत्त्वा आहुः सर्व्वावन्तं भगवन् सहं बुद्धक्षेत्रं स क्षितिगगनं बोधिसत्त्वैः स्फुटं समनुपश्यामः । न चानेकसत्त्वस्याप्यवकाशोऽस्ति क्षितौ गगने वा यत्र वयं प्रतितिष्ठेमः । स च विमले गुणतेजराजस्तथागत आह । मा कुलपुत्रा एवं वदथ नास्ति सहे बुद्धक्षेत्रेऽवकाशः विस्तीर्णावकाशः स शाक्यमुनिस्तथागतोऽचिन्त्यैर्बुद्धगुणैः पूर्वप्रणिधानेन विस्तीर्णो तथागतस्य कृपाशासनावतारप्रवेशा त्रिशरणगमनं त्रियानधर्म्मदेशनामारभ्य धर्म्मं देशयति । त्रिविधं वः शिक्षासम्वरं देशयति त्रीणि च विमोक्षद्वाराण्युपदर्शयति त्रिभ्योऽपायेभ्योः सत्त्वानुद्धरति तिसृषु च शिवेषु पथेषु प्रतिष्ठापयति । एकस्मिन्समये कुलपुत्र-शाक्यमुनिस्तथागतो चिराभिसम्बुद्धो वैनेयसत्त्वावेक्षया मध्ये शैलपर्वते इन्द्रस्तस्य यक्षस्य भवने शालगुहायां विहरति स्म सप्ताहमेकपर्य्यङ्केनातिनामयति विमुक्तिप्रीतिसुखं प्रतिसंवेदयति सर्व्वावती च सा सालगुहा तथागतकायेन स्फुटा नास्ति तत्रावकाशोऽन्तशश्चतुरङ्गुल-

प्रमाणं न शक्यं । तत्र च ... दशभिर्दिग्भिर्द्वादशनयुता बोधिसत्त्वानां तत्र षष्टे लोकधातौ ... पर्वतस्याभिमुखं स्थित्वा शाक्यमुनेस्तथागतस्य वन्दनाय पर्युपासनाय धर्मश्रवणाय । स च तत्पुत्र शाक्यमुनिस्तथागतस्तत्र पर्षदि ... संस्तरास्तीर्णान् ... सा च शालगुहा । एवं विस्तीर्णा चेयं विपुला च प्रादुर्भूता यदा ते द्वादशनयुता बोधिसत्त्वानां तत्र शालगुहायां प्रविष्टा विस्तीर्णावकाशं पश्यन्ति स्म । एकेषाञ्च बोधिसत्त्वानां तथागतस्य विविधबोधिसत्त्वविकुर्वितेन पूजां कृत्वा एकैको बोधिसत्त्वस्य ... सिंहासनं निर्मिंतवान् यत्रोपविष्टा धर्म्मं शृण्वन्ति स्म । एवं विस्तीर्णावकाशः ... स शाक्यमुनिस्तथागतः ते च बोधिसत्त्वाः तस्य शाक्यमुनेस्तथागतस्य सकाशाद्धर्मं श्रुत्वा शाक्यमुनेस्तथागतस्य पादौ शिरसा वन्दित्वा त्रिःकृत्वः प्रदक्षिणीकृत्य स्वकस्वकेषु बुद्धक्षेत्रेषु प्रक्रान्ताः । अचिरप्रक्रान्तानां च तेषां बोधिसत्त्वानां शालगुहा यथा पौराणा संस्थिता तत्र चतुर्द्वीपिकायां कौशिको नाम शक्र आयुःपरिक्षीणस्तिर्यग्योन्युपपत्तिभयभीतः स चतुरशीतिभिस्त्रयस्त्रिंशद्देवपुत्रैः सार्द्धं येन शालगुहा येन च भगवांस्तेनोपसंक्रामति । उपसंक्रम्य सामन्तेन इन्द्रशैलस्य शालगुहाभवने स्थितः तथा भगवताऽनुभावेन ... यद्नूनं वयमपि पञ्चशिखं गन्धर्वपुत्रमध्येषेम । स च पञ्चशिखो मधुरेण स्वरेण भगवन्तमभिमुखं स्थापयिष्यति । तदा भगवान् ध्यानसमाधिभ्यो व्युत्थास्यति । ततः शक्रः पञ्चशिखं गन्धर्वपुत्रमधीष्टवान् ।

अथ पञ्चशिखो वीणां मनोज्ञेन गीतवादित्रेण भगवतोऽनुभावेन पञ्चभिस्तवशतैर्भगवतो वर्णमभाषत । यदा च कुलपुत्र पञ्चशिख आरब्धो भगवतोऽभिस्तवनाय ततः स शाक्यमुनिर्भगवान् सुघोषवैरोचनकेतुं नाम समाधिं समापन्नस्तेन समाधिना ये षष्टे लोकधातौ महर्द्धिकयक्ष-राक्षसा वा असुरा वा गरुडा वा किन्नरा वा महोरगा वा गन्धर्वा सर्वे कामावचरा देवा सर्वे रूपावचरा देवपुत्रास्तत्र सन्निपाता बभूवु ये च स्वरभक्तिकास्ते स्वरं श्रुत्वा प्रसीदन्ति । ये वर्णयशोभक्तिका स्ते भगवतो वर्णं श्रुत्वा तस्य भगवतः सकाशे तीव्रप्रेमप्रसादगुरुगौरवचित्रीकारजाताः प्रसीदन्ति ये वेणुवाद्यभक्तिकास्ते वेणुवाद्यं श्रुत्वा प्रसीदन्ति ततः शाक्यमुनिर्भगवांस्ततः समाधेर्व्युत्थाय शालगुहाया द्वारं दर्शयामास शक्रश्चोपसंक्रान्तो भगवन्तं पृष्टवान् भगवान् कुत्रोपविशामः स शाक्यमुनिस्तथागत उवाच । निषीद त्वं यदा यावत्सर्वे समागताः ततः शाले गुहा एवं विस्तीर्णा संस्थिता यथा द्वादशगङ्गानदी-वालिकासमा यदास्तत्र गुहायां प्रविष्टा निषण्णायाश्च तस्याः पर्षदः स शाक्यमुनिस्तथागतो धर्म्मदेशनां कृतवान्यथा ये तस्मिन् पर्षदि श्रावकयानिका निषण्णास्ते श्रावकयानकथां शृण्वन्ति । नवनवतिकोट्यस्तत्र स्रोतापत्तिफलं प्राप्ताः ये च तत्र पर्षदि अनुत्तरसम्यक्सम्बुद्धयानिकास्ते शुद्धां महायानकथां शृण्वन्ति । तत्र च पञ्चशिखगन्धर्वपर्षद्भ्यः अष्टादशनयुता अवैवर्त्तिकाः संस्थिता अनुत्तरायां सम्यक्सम्बोधौ कैश्च तत्रोत्पादितं त्रिषु यानेषु चित्तं तत्र कैश्चिदनुत्तरायां सम्यक्सम्बोधौ चित्तमुत्पादितं कैश्चित्तत्र प्रत्येकबुद्धयाने चित्तमुत्पादितं कैश्चिच्छ्रावकयाने चित्तमुत्पादितं स च तत्र कौशिकः शक्रो भयात्परिमुक्तो वर्षशतसहस्रं चायुर्विवृद्धं । अवैवर्त्तिकश्चानुत्तरायां सम्यक्सम्बोधौ बभूव तदेवं विस्तीर्णावकाशः

16

कुलपुत्र स शाक्यमुनिस्तथागतः एवं विस्तीर्णं चास्य तथागतस्य स्वरमण्डलं । न शक्यं केन चित्तस्य तथागतस्य स्वरमण्डलस्य पर्य्यन्तमुद्ग्रहीतुं वा गणयितुं वा विस्तीर्णं तस्य तथागतस्योपायकौशल्यं सत्त्वपरिपाकाय न शक्यं तस्य तथागतस्योपायकौशल्यस्य पर्य्यन्तमुद्ग्रहीतुं विस्तीर्णकायश्च कुलपुत्र तथागतो न शक्यं केनचित्तस्य मूर्द्धानमवलोकयितुं कायस्य वा पर्य्यन्तमधिगन्तुं । यावन्तश्च सत्त्वा एतर्हि तत्र षष्ठे बुद्धक्षेत्रे सन्निपतिता यदि ते सत्त्वाः शाक्यमुनेस्तथागतस्य कुक्षौ प्रविशेयुस्ते सर्व्वे तत्र विचरेयुस्ते च सत्त्वास्तस्य तथागतस्यैकरोमकूपे प्रविशेयुः निष्क्रमेयुश्च ते एकरोममुखात्तस्य तथागतस्य नो शक्ताः पर्य्यन्तमुद्ग्रहीतुं [illegible] पूर्णत्वम्भान्ताश्चो दिव्येनापि चक्षुषा तदेवं विस्तीर्णकायः स शाक्यमुनिस्तथागतः । पुनरपरं कुलपुत्र विस्तीर्णबुद्धक्षेत्रः स शाक्यमुनिस्तथागतो यावन्तश्च दशसु दिक्षु गङ्गा-नदी-वालिकासमा बुद्धक्षेत्रा एवं परिपूर्णा भवेयुः । सत्त्वैस्तावन्त्यापि नामैतर्हि षष्ठं बुद्धक्षेत्रं सर्व्वे ते सत्त्वा एतर्हि षष्ठे बुद्धक्षेत्रे विशेयुः सर्व्वे ते तत्र विचरेयुः तत्कस्माद्धेतो[illegible] तस्य तथागतस्य पूर्व्वं प्रथमचित्तोत्पादेनानुत्तरायां सम्यक्सम्बोधौ प्रणिधानं बभूव । [illegible] कुलपुत्रैकं गङ्गा-नदी-वालिकासमा लोकधातवः स चेत् कुलपुत्र यावद्दशसु दिक्षु सर्व्वे गङ्गा-नदी-वालिकासमा बुद्धक्षेत्रा एवं विस्तीर्णाः तद्यथैतर्हि षष्ठबुद्धं परिपूर्णं सत्त्वैः ते सर्व्वे एतर्हि सह लोकधातौ प्रविशेयुस्ते सर्व्वे तत्र विचरेयुरेवं रूपं । तस्य तथागतस्य पूर्व्वं [illegible]नुत्तरज्ञानप्रतिलम्भाय प्रणिधानं बभूव । एवं विस्तीर्णबुद्धक्षेत्रः स कुलपुत्र शाक्यमुनिस्तथागतः । अभिश्च धर्म्मविशिष्टतरः स शाक्यमुनिस्तथागतो यथा[illegible] [illegible] इमां चन्द्ररोचविमलां पुण्याकूलस्य पश्चिमां दिशं यथा स्वयं दृष्ट्वा षष्ठं [illegible] [illegible] तं शाक्यमुनिं तथागतमार्याणकौशल्यं प्रचुरत ॥ [illegible] [illegible] पूर्णां [illegible] आधिसत्त्वा [illegible] [illegible] सह लोकधातु । तत्र विंशतिः [illegible] भगवन् [illegible] सह लोकधातु तत्र शाक्य[illegible] [illegible]

[illegible]

एवमभिरम्या बुद्धक्षेत्रात् प्रत्येकस्य तथागतस्यासनं कल्पयन्ति ये च तत्र बोधिसत्त्वाः सन्निपतितास्ते चापि दृष्ट्वात्मीयस्य तथागतस्यासनं कल्पितं परिपृच्छन्ति स्म । पेयालं यथा पूर्वोक्तं सर्वत्रैवं वक्तव्यं । तेन च समयेनाप्रमेयासंख्येयाः पुरिमायां दिशि तथागता दूता बोधिसत्त्वा इमं सर्वं बुद्धक्षेत्रं सह चन्द्ररोचविमलैः सम्प्राप्ताः शाक्यमुनेस्तथागतस्य परिपृच्छनाय पूजनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च । समनन्तरपरिवर्मितो भगवतः पुरिमायां दिशि बुद्धक्षेत्रनामपरिकीर्त्तनं बुद्धानां भगवतां । दक्षिणां दिशं पुनर्भगवानारब्धः परिकीर्त्तयितुं । यथाप्यहं कुलपुत्र दक्षिणस्यान्दिशीतो बुद्धक्षेत्राद्दशगङ्गा-नदीवालिकासमानि बुद्धक्षेत्राण्यतिक्रम्य तत्र सर्वशोकापगतो नाम लोकधातुस्तत्राशोकश्रीर्नाम तथागतस्तिष्ठति ध्रियते यापयति । मया स भगवान् सर्वप्रथमं पूर्वबोधिसत्त्वचारिकां चरमाणेनानुत्तरायां सम्यक्सम्बोधौ यावद्यथापूर्वोक्तं जम्बुध्वजे बुद्धक्षेत्रे धर्मेश्वरविनर्द्दिर्नाम तथागतः मेरुप्रतिष्ठिते बुद्धक्षेत्रे गतोश्वरमालेन्द्रोनाम तथागतः गुणेन्द्रनिर्यूहे बुद्धक्षेत्रे सिंहविजृम्भितराजा नाम तथागतः । मणिमूलकूटे बुद्धक्षेत्रे नागयशविजितगर्भो नाम तथागतः । मुक्ताप्रभसङ्घये बुद्धक्षेत्रे रत्नगुणविजृम्भितयशो नाम तथागतः देवगर्भे बुद्धक्षेत्रे ज्योतिगर्भो नाम तथागतः चन्दनकूले बुद्धक्षेत्रे सत्यर्थविधानकीर्त्तिर्नाम तथागतः विशिष्टगन्धे बुद्धक्षेत्रे पुष्पदत्तसालराजा नाम तथागतः सुविशिष्टे बुद्धक्षेत्रे मनोज्ञघोषस्वरविनर्दितो नाम तथागतः दुरक्षे बुद्धक्षेत्रे ज्ञानध्वजविक्रमराजा नाम तथागतः सर्वलोके बुद्धक्षेत्रे तेजोश्वरप्रभासो नाम तथागतः अभिरञ्जितबुद्धक्षेत्रे सुमनोज्ञस्वरनिर्घोषो नाम तथागतः । रत्नविभवे बुद्धक्षेत्रे रत्नतलनागेन्द्रो नाम तथागतः पद्मसुगन्धकूटकारे बुद्धक्षेत्रे धर्ममेघनिर्घोषेश्वरकोष्ठो नाम तथागतः पेयालं यथापूर्वोक्तं । एवमप्रमेयासंख्येयानां बुद्धानां भगवतां दक्षिणस्यान्दिश्यासनानि कल्पयन्ति । सर्वेऽपि बुद्धा भगवन्तः शाक्यमुनेस्तथागतस्य वर्णं यशःकीर्त्तिशब्दमीरयन्ति । तावत्तेन समयेनाप्रमेयासंख्येया दक्षिणस्यान्दिशि तथागतदूता बोधिसत्त्वाः सह चन्द्ररोचविमलैः सुखेन सर्वं बुद्धक्षेत्रमनुप्राप्ताः शाक्यमुनेस्तथागतस्य पृच्छनाय यावद्धर्मश्रवणाय ।

पुनश्च भगवानाह ॥ यथाप्यहं कुलपुत्र पश्चिमायां दिशीतो बुद्धक्षेत्रात् [illegible] बुद्धक्षेत्रनयुतशतसहस्राण्यतिक्रम्य तत्र शान्तमतिर्नाम बुद्धक्षेत्रं तत्र रत्नशिखिर्नाम तथागतस्तिष्ठति ध्रियते यापयति धर्मञ्च देशयति मया स भगवान् पूर्वं बोधिसत्त्व[illegible] चर्यां चरमाणेन सर्वप्रथमं समादापितो यावद्यथापूर्वोक्तं । बुद्धक्षेत्रात् [illegible] कीर्त्ति नाम तथागतः [illegible] नाम तथागतः [illegible]कीर्त्ति [illegible] [illegible] विक्रमः धर्मेश्वरराजः [illegible] [illegible] एवमप्रमेयासंख्येयानां पश्चिमायां बुद्धानां भगवतां [illegible] शाक्यमुनेस्तथागतस्य [illegible] परिकीर्त्तितानि तथागतासनानि कल्पयन्ति । [illegible] दिशि दूतभूता बोधिसत्त्वाः सह चन्द्ररोचविमलैः [illegible] [illegible] धर्मश्रवणाय । [illegible] [illegible] पूर्वदक्षिणा [illegible]

[illegible]

पश्याम्यहं कुलपुत्रोत्तरपश्चिमायां दिशीतो बुद्धक्षेत्रादष्टानवतिबुद्धक्षेत्रकोटीनयुतशतसहस्रा-
ण्यतिक्रम्य तत्र विजयं नाम बुद्धक्षेत्रं विगतसन्तापोद्भववैश्रमणसालराजो नाम तथागतः ।
पूर्वं बोधिसत्त्वभूतेन बोधिसत्त्वचर्य्यां चरमाणेन सर्वप्रथममनुत्तरायां सम्यक्सम्बोधौ समा-
दापितो यावत्षट्सु पारमितासु यावन्मयासर्वप्रथमं तिष्ठतां यापयतां बुद्धानां भगवतां
सकाशमुपनी(नी)ते । यत्र तेन व्याकरणं प्रतिलब्धमनुत्तरायां सम्यक्सम्बोधौ यदा नाम परि-
कीर्त्तितं तदासनं कम्पितं यावच्चतुरशीतिसत्त्वानां वर्णभक्तिसंस्थानरूपव्याहारसहस्राणि
तथा शाक्यमुनिं तथागतं पश्यन्ति धर्म्मं च शृण्वन्ति तत्र च पर्षदि द्वौ बोधिसत्त्वौ एकः
विगोपशिखरो नाम द्वितीयः संरोचनबुद्धो नाम स च विगतसन्तापोद्भववैश्रमणशालराजो
नाम तथागतस्तौ द्वौ बोधिसत्त्वौ आमन्त्रयित्वैवमाह । गच्छतं युवां कुलपुत्रौ सहे बुद्ध-
क्षेत्रे मद्वचनाच्छाक्यमुनेस्तथागतस्यारोग्यकौशल्यं सुखस्पर्शविहारतां परिपृच्छत तावाहतुः-
सर्वावन्तं भदन्त भगवन्तानां* सहं बुद्धक्षेत्रं स क्षितिगगनं समनुपश्यामः न च तत्रैकसत्त्व-
स्याप्यवकाशोऽस्ति क्षितौ वा गगने वा यत्रावां प्रतिष्ठेवहि स च तथागत आह ॥
स कुलपुत्रैवं वदत नास्ति सहे बुद्धक्षेत्रेऽनवकाशः तत्कस्माद्धेतो विस्तीर्णावकाशः कुलपुत्रौ
स शाक्यमुनिस्तथागतोऽचिन्त्यैर्बुद्धगुणैः पूर्वप्रणिधानेन विस्तीर्णा तस्य तथागतस्य कृपा-
शासनावतारप्रवेशः त्रिशरणगमनं त्रिभिर्यानैर्धर्म्मं देशयति त्रिविधं शिक्षासम्वरं देशयति
त्रीणि विमोक्षद्वाराणि प्रकाशयति त्रिभ्यश्चापायेभ्यः सत्त्वानुद्धरति त्रिषु च शिवपथेषु
सत्त्वान् प्रतिष्ठापयति । एकस्मिं समये कुलपुत्र स शाक्यमुनिस्तथागतोऽचिराभिसम्बुद्धो
वैनेयसत्त्वावेक्षया विषमे शैलेन्द्रपर्वतमध्ये इन्द्रास्तस्य यक्षस्य भवने शालगुहायां विहरति स्म
सप्ताहमेकपर्य्यङ्केनातिनामयति स्म । विमुक्तिप्रीतिसुखसंवेदी । सर्व्वावती च सा शाल-
गुहा स्फुटा तथागतकायेन नास्ति तत्रावकाशोऽन्ततश्चतुरङ्गुलप्रमाणं यन्न तथागतकायेन स्फुटं
तस्य च सप्ताहस्यात्ययेन दशभ्यो दिग्भ्यः । द्वादशनयुता बोधिसत्त्वानां महासत्त्वानां सहे
लोकधातौ सम्प्राप्तास्तस्य शाक्यमुनेस्तथागतस्य वन्दनाय यावदिमैश्चतुर्भिर्धर्मै विशिष्टतराः ।

स शाक्यमुनिस्तथागतो यथान्ये तथागता एतद्वोचत यूयं कुलपुत्रा इमां चन्द्रोदविमलां
पुष्पां गृहीत्वा गच्छत पश्चिमां दिशं यथा स्वयं दृष्ट्वा तं बुद्धक्षेत्रं मम वचनात्तस्य शाक्यमुने-
स्तथागतस्यारोग्यकौशल्यं पृच्छत । स च विगतसन्तापोद्भववैश्रमणशालराजस्तथागतः पुष्पां
गृहीत्वा विगोपशिखरस्य बोधिसत्त्वस्य ददाति संरोचनबुद्धस्य च बोधिसत्त्वस्य महा-
सत्त्वस्य । एवं चाह । गच्छत कुलपुत्रौ सर्मर्द्धिबलाधानेन सहं बुद्धक्षेत्रं तत्र विंशति-
प्राणसहस्राण्याहुः । वयमपि भगवन् गमिष्यामस्तथागतस्यानुभावेन सहं बुद्धक्षेत्रं शाक्य-
मुनिं तथागतं दर्शनाय वन्दनाय पर्युपासनाय । तथागत आह । गच्छत कुलपुत्रा यथा-
भिप्रायाः । ततस्तौ द्वौ बोधिसत्त्वौ सार्द्धं विंशतिभिर्बोधिसत्त्वसहस्रैस्तस्य तथागतस्य
रि(ऋ)ध्यनुभावेन† ततो विजयाद्‡ बुद्धक्षेत्रात् सम्प्रस्थिताः एकक्षणेनेह बुद्धक्षेत्रेऽनुप्राप्ता गृध्र-
कूटे पर्व्वते प्रत्यस्थुः । एकान्तस्थिताश्च येनै शाक्यमुनिस्तथागतस्तेनाञ्जलिं प्रणम्याहुः ।

---

* भगवतामिति पाठः साधुः । † ऋद्ध्यनुभावेन इति पाठः साधुः । ‡ विजयाद् इति पाठ साधुः ।

अस्ति भदन्त भगवन्नुत्तरपूर्व्वायां दिशि यथापूर्व्वोक्तं तेन तथागतेन मे चन्द्ररोचविमलाः पुष्पाः प्रेषिता भगवतश्चारोग्यकौशल्यं पृच्छति । एवं मारभवनविध्वंसनस्य तथागतस्यासनं कम्पितं । ये च तत्र बोधिसत्त्वाः सन्निपतितास्ते चापि दृष्टान्तमारभवनविध्वंसनं तथागतं परिपृच्छन्ति । यावद्यथापूर्व्वोक्तं । एवं सालेन्द्रराजा विक्रमरश्मिपद्मोत्तरः चन्दनामेरुराजः सागरः राजज्योतिज्ञानविक्रमस्तथागतः यावत्तेन च समयेनाप्रमेया संख्येया उत्तरपुरिमायां दिशि तथागतास्ते बोधिसत्त्वाः सहचन्द्ररोचविमलपुष्पैरिह सहे बुद्धक्षेत्रे समागताः शाक्यमुनेः तथागतस्य पृच्छनाय पूजनाय वन्दनाय धर्म्मश्रवणाय तावदेव शाक्यमुनिस्तथागत स्वऋद्धानुभावेन सर्व्वेषां सत्त्वानां ये सहे बुद्धक्षेत्रे सन्निपतितास्तेषामेकैकस्य सत्त्वस्य योजनप्रमाणमात्रमात्मभावः संस्थितः सर्व्वावन्तं च सहं बुद्धक्षेत्रं एवंरूपैः। सत्त्वैः स्फुटं न कश्चिद् बुद्धक्षेत्रे वा गगने वाऽवकाशो यः सत्त्वैरस्फुटोऽन्तशो योजनशलाकाप्रदेशमात्रमपि यः सत्त्वेभ्यो न स्फुटोभूत् । सर्व्वे च ते सत्त्वाः शून्यमाकाशमपश्यन्ति न च परस्परं पश्यन्ति न चैषां पर्व्वतसुमेरुचक्रवाडमहाचक्रवाडपर्व्वताश्चक्षुष आभासमागच्छन्ति न लोकान्तरिका दिव्या विमाना ऊर्द्धं यावदधोकाशनचक्रं ततोर्द्धं पृथिवीचक्षुषो नाभासमागच्छन्ति स्थापयित्वा तथागतं शाक्यमुनिं । ते तथागतं पश्यन्ति । तत्र च भगवानाकाशस्फुरणं धर्म्मविच्छेदप्रशुद्धिसमाधिं समापन्नो यतस्ते चन्द्ररोचविमलाः पुष्पाः सर्व्वे रोमसुखेषु भगवतः प्रविशन्ति । सर्व्वे च ते सत्त्वाः पश्यन्ति सहे लोकधातावन्तर्गता विगताः सर्व्वसत्त्वानां चित्तचैतसिकेषु सनमिकारप्रसन्दर्शनता । ते चैव भगवतो रोमसुखे निरीक्षन्ते स्म तत्र चोद्यानमद्राक्षुः नानारत्नवृक्षं नानापत्रं नानापुष्पं नानाफलाकीर्णं नानावस्त्रं नानाछत्रध्वजपताकाकेयूरमुक्तिकाहारालङ्कृतांश्चाश्वं वृक्षां पश्यन्ति तद्यथापि नाम सुखावत्यां लोकधातावुद्यानं सर्व्वेषां च तेषां सत्त्वानामेतदभवत् गच्छामो वयमेतदुद्यानं दर्शनाय । सर्व्वे च ते सत्त्वा ये सहे लोकधातावन्तर्गताः स्थापयित्वा नैरयिकां याम्यलौकिकां तिर्य्यग्योनिकां अपायचरां सर्व्वे परिशिष्टाः सत्त्वास्तस्य तथागतस्य रोमसुखेभ्यस्तथागतशरीरे प्रविष्टाः ।

अथ भगवांस्तामृद्धिं प्रतिलम्भयित्वा व्युत्थितः ततस्ते सत्त्वाऽन्योन्यं दृष्टाश्चुः कुत्र शाक्यमुनिस्तथागतः । मैत्रेयो बोधिसत्त्व आह । सम्प्रजानं ततः सत्त्वाः समन्वाहरत सर्व्वे वयं तथागतस्य कुक्षौ सन्निपतिताः ततस्ते सत्त्वाः सान्तरबाहिरं तथागतकायं दृष्ट्वा आश्चर्यप्राप्ताभूता एवा वयं तथागतस्य कुक्ष्यन्तर्गताः सन्निपतिताश्च तेषामेतदभवत् कुतो वयं तथागतस्य कुक्षौ प्रविष्टाः केनास्मिन् प्रवेशिताः ततो मैत्रेयः सर्व्वावतीपर्षदं स्वरेण विज्ञापयामास शृण्वन्तु भवन्तस्तथागतस्यैवर्द्धिविकुर्वनप्रातिहार्य्यं यदस्माकं हितकरः शास्ता धर्म्मान्देशयति । यद्युष्माभिः सर्व्वचेतसा समन्वाहर्त्तव्याः ततः सर्व्वावतीपर्षत्प्राञ्जलीभूताः । भगवांश्च सर्व्वसुखचर्य्याधर्म्मं देशयति स्म । तत्र कतरा सर्व्वसुखचर्य्या यदुत संसारपङ्कादुत्तारणं आर्य्याष्टाङ्ग मार्गावतारणं सर्व्वदाता ज्ञानसम्भारपरिपूरकता । तत्र दशप्रकारा ध्याननिर्वेशचित्तोत्पादपरिणामनता । यदुत सर्व्वसत्त्वेभ्यो महाकरुणाविशाधिष्ठानं हितवस्तुसङ्गृहनता असंख्यानिसत्त्वोत्तारणताया महानावसमुदानता । अमुक्तमोचनताप्रज्ञाद् । अनन्तविपर्य्यासपरिमोचनताया महाभिन्नादानुगाहनप्रज्ञादः नैरात्म्यधर्म्मप्रयवेक्षणतया ।

सर्व्वलोकधातुगमनसन्नाहः । मायास्वप्रतिभासोपमसर्व्वधर्म्मावबुध्यनतया सर्व्वलोकधात्व-भासनालङ्करणसन्नाहः । शीलस्कन्धाधिष्ठानपरिशुद्धा दश तथागतबलपरिनिष्पादसन्नाहः । सर्व्वपारमितापरिपूर्णा चतुर्वैशारद्यप्रतिलाभसन्नाह । यथावादितथाकारितया यावदष्टादशा-वेणिकबुद्धधर्म्मनिरवशेषप्रतिलाभसन्नाहं बोधिसत्त्वानां यथाश्रुतधर्म्मप्रतिपत्तिरप्रपञ्चनता चेयं दशप्रकाराणि वेशधर्म्ममुखचर्य्या । अलक्षणामुखपरिज्ञाणातिचर्य्यायाः सर्व्वधर्म्मनैरात्म्य-मनभिकारचित्तानुत्पादानिरोधसमयमवैवर्त्तिकभूमिर्यन्न सम्यक्त्वविसंयुक्तेदमशायतसवि-त्तिसमिमस्य खलु पुनर्धर्म्मपर्य्यायस्य भाष्यमाणस्याशीतिकोटी गङ्गा-नदी-बालिकासमाः सत्त्वास्तथागतस्य कुक्षिगता अवैवर्त्तिका अभूवन्ननुत्तरायां सम्यक्सम्बोधौ । गणनाति-क्रान्ताश्च तत्र बोधिसत्त्वा महासत्त्वा ये नानाविधधारणीक्षान्तिप्रतिलब्धा अभूत् सर्व्वे च पुनस्तथागतशरीराद्रोमसुखेभ्यो निष्क्रान्ता आश्चर्य्यप्राप्ता भगवतः पादौ वन्दित्वा दशदिशः प्रक्रान्ताः स्वकस्वकेषु बुद्धक्षेत्रेषु गतास्तथागतस्य स्वरमण्डलकायप्रमाणप्रापनार्थं । तत्र ये बोधिसत्त्वाः पुरिमां दिशं गच्छन्ति अप्रमेया संख्येयाः पुरिमायां दिशि यद्बुद्धक्षेत्रानति-क्रामन्ति न च शाक्यमुनेस्तथागतस्य स्वरमण्डलं प्रतिहन्यते । एवं च तत्र स्वरं शृण्वन्ति विचित्रपदार्थव्यञ्जनाः तद्यथा शाक्यमुनेस्तथागतस्य पुरतो निषण्णै धर्म्मः श्रुतः । एवमेवास्य धर्म्मं शृण्वन्ति । अपि च तत्रापि शाक्यमुनेस्तथागतस्य कायस्योनत्वं वा पूर्णत्वं वा न प्रज्ञायते शाक्यमुनेस्तथागतस्य कायः स्फुटो दृश्यते बोधिसत्त्वैः श्रावकैश्चाप्रमेया संख्येया बोधिसत्त्वाः श्रावकाश्चैकरोमसुखे शाक्यमुनेस्तथागतस्य प्रविशन्तो निष्क्रामन्तश्च संदृश्यन्ते । एवं द्वितीये रोमसुखे यावत्सर्व्वरोमसुखेभ्यः प्रविशन्तो निष्क्रामन्तश्च संदृश्यन्ते यावच्चैवं दशसु दिक्षु वक्तव्यं सर्व्वावती च सापर्षा यावद्भगवतः कायान्तर्गताः सा भगवतः कायान्तर्गता रोमसुखेभ्यो निष्क्रम्य भगवतः पादौ शिरसा वन्दित्वा भगवन्तं त्रिप्रदक्षिणीकृत्वा भगवतो-ऽभिमुखं प्रत्यस्याद्भगवन्तमेव विचित्रार्थपदव्यञ्जनस्तवव्याहारैःस्तवमाना ।

अथ तावच्चैव कामावचरा रूपावचराश्च देवपुत्रा विचित्रां च गन्धमाल्यविलेपनवृष्टिं प्रवर्षिता दिव्यानि च तुर्य्याणि प्रवादितवन्तो दिव्यानि च छत्रध्वजपताकावस्त्राद्युष्याभरणानि भगवतः पूजायोद्युक्ताः । तत्र वैशारद्यसमुद्धारणिर्नाम बोधिसत्त्वो येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत् किं नामायं भदन्त भगवन् महाव्याकरणं सूत्रान्तः । भगवानाह । सर्व्वज्ञताकारधारणीमुखप्रवेशो नाम बहुबुद्धकं नाम बहुसन्निपातं नाम बोधिसत्त्वव्याकरणं नाम वैशारद्यमार्गोत्तारणं नाम समाधानकल्पावतरणो नाम बुद्धक्षेत्रसन्दर्शनो नाम सागरो-पमो नाम गणनातिक्रान्तो नाम करुणापुण्डरीको नाम । पुनरप्याह । कियन्तं भदन्त भगवन् कुलपुत्रो वा कुलदुहिता वा पुण्यस्कन्धं प्रसविष्यति । य इमं धर्म्मपर्य्यायं श्रोष्यति उद्ग्रहीष्यति धारयिष्यति वाचयिष्यति परेषां च विस्तरेण सम्प्रकाशयिष्यति लिखिष्यति लिखापयिष्यति अन्तश एकगाथामपि । आद्यपूर्व्वं च मयोक्तमिह पुण्यस्कन्धं संक्षेपेणेदानीं कथयिष्यामि । यः कश्चिदिमं धर्म्मपर्य्यायं श्रोष्यति उद्ग्रहीष्यति धारयिष्यति वाचयिष्यति परेभ्यश्च विस्तरेण सम्प्रकाशयिष्यति अन्तश एकगाथामपि । यश्च पुनः पश्चिमायां पश्चात्पञ्चाशामन्तशो लिखित्वा धारयिष्यति । स बहुतरं पुण्यस्कन्धं प्रसविष्यति । न

त्वेवं षोडश महाकल्पान् षट्पारमिताचरमाणस्य बोधिसत्त्वस्य पुण्यस्कन्धः। तस्माद्धेतोः सदेवकस्य लोकस्य समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः सदेवनागगन्धर्व-कुम्भाण्डप्रेतपिशाचकिन्नरासुराणां दुष्टचित्तानां प्रसादनः सर्वरोगाणां प्रशमनः सर्वकलि-कलहविग्रहविवादव्युपशमनः सर्ववाताकालमरणारोगप्रशमनः सर्वदुर्भिक्षप्रशमनकरः सस्य-करणीयः सुभिक्षकर आरोग्यसामग्रीकरः भीतानामभयसुखकरः क्लेशव्युपशमनकरः कुशल-मूलविवृद्धिकरः अपायदुःखप्रमोचनकरस्त्रिभिर्यानैर्मार्गसन्दर्शनकरः समाधिधारणीक्षान्ति-प्रतिलाभकरः सर्वसत्त्वानामुपजीव्यकरो वज्रासननिषीदनकरः। चतुर्मारधर्षणकरो बोधि-पक्षाभिसंबोधनकरो धर्मचक्रप्रवर्तनकरः आर्यमार्गधनविरहितानां सत्त्वानां बोधिपक्ष-वृद्धिकरः अभयपुरनगरप्रवेशकरश्चायं मया धर्मपर्यायो भाषितः कस्य इमं धर्मपर्यायं परिन्दामि को य इमं धर्मपर्यायं पश्चिमायां पञ्चाशत्यां रक्षिष्यति। अधर्माभिभूतानां सत्त्वानां भिन्नशीलानां च भिक्षूणां कर्णपुटे प्रकाशयिष्यति। अधर्मरागरक्तानां विषम-लोभाभिभूतानां मिथ्याधर्मपरिचितानां। अपरिपक्वचित्तानां संवेजयिष्यति। सन्त्यत्र च आपन्नाः-भगवतश्चेतसा चित्तमाज्ञाय तत्र पर्षदि मेरुगुप्तो नाम यक्षपर्षन्निषण्णः।

अथ मैत्रेयो बोधिसत्त्वो महासत्त्वस्तं मेरुगुप्तं यक्षाधिपतिं गृहीत्वा भगवतः सकाश-मुपनीतवान्। भगवानाह। उद्गृहाण त्वं यक्ष इमं पर्यायं पश्चिमायां पञ्चाशत्यां दशान्तरगतानामवैवर्तिकानां बोधिसत्त्वानां कर्णपुटेषु प्रकाशय। अयं चाधिवासितकुशल-सङ्ग्रहस्याहैवं भदन्त भगवन्नित्युक्त्वा प्रतिशृण्वन्तो यक्षा भदन्त भगवन् पूर्वं प्रणिधानेन मम अनुत्तरायां सम्यक्संबोधौ बोधिचित्तं समुत्पादित-मासीत्। तथा मया चतुर्षु द्वीपविहारेषु प्रतिपूरितानि आवैवर्तिकभूमौ च प्रतिष्ठापितानि अहं च सत्त्वानां रक्षयैव परिपाचयामि। पश्चिमायां पञ्चाशत्यां इमं धर्मपर्याय-मुद्देक्ष्यति यावच्च य इदमनुत्तरिकामपि गाथां धारयिष्यति॥ इदमवोचद् भगवानात्तमनाः सर्वावती पर्षत् सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति॥

इति कारुणापुण्डरीकं नाम महायानसूत्रं समाप्तम्॥

शुभमस्तु॥

* [illegible]

सर्व्वलोकधातुगमनसन्नाहः । मायास्वप्रतिभासोपमसर्वधर्माधिमुक्तिज्ञानतया सर्व्वलोकधात्ववभासनालङ्कारसन्नाहः । शीलस्कन्धाधिष्ठानपरिशुद्धा दश तथागतबलपरिनिष्पादसन्नाहः । सर्व्वपारमितापरिपूर्णा चतुर्वैशारद्यप्रतिलाभसन्नाहः । यथावादितयाकारितया यावदष्टादशावेणिकबुद्धधर्मनिरवशेषप्रतिलाभसन्नाहं बोधिसत्त्वानां यथाश्रुतधर्मप्रतिपत्तिरप्रपञ्चनता चेयं दशप्रकाराणि वैशधर्मसुखचर्या । अस्वाचासुखपरिजागर्तिचर्यायाः सर्वधर्मनैरात्म्यमनसिकारचित्तानुरूपादानिरोधसमयसवैवर्त्तिकभूमिर्यत्र समवर्त्तविवर्त्तसंस्कारच्छेदसशाश्वतसर्वविचित्रसमिमस्य खलु पुनर्धर्मपर्य्यायस्य भाष्यमाणस्याशीतिकोटौ गङ्गा-नदी-वालिकासमाः सत्त्वास्तथागतस्य कुक्षिगता अवैवर्त्तिका अभूवन्ननुत्तरायां सम्यक्सम्बोधौ । गणनातिक्रान्ताश्च तत्र बोधिसत्त्वा महासत्त्वा ये नानाविधधारणीक्षान्तिप्रतिलब्धा अभूत् सर्व्वे च पुनस्तथागतशरीराद्रोमसुखेभ्यो निष्क्रान्ता आश्चर्य्यप्राप्ता भगवतः पादौ वन्दित्वा दशदिशः प्रक्रान्ताः स्वकस्वकेषु बुद्धक्षेत्रेषु गतास्तथागतस्य स्वरमण्डलकायप्रमाणप्रापणार्थं । तत्र ये बोधिसत्त्वाः पुरिमां दिशं गच्छन्ति अप्रमेया संख्येयाः पुरिमायां दिशि यद्बुद्धक्षेत्रानतिक्रामन्ति न च शाक्यमुनेस्तथागतस्य स्वरमण्डलं प्रतिहन्यते । एवं च तत्र स्वरं शृण्वन्ति विचित्रपदार्थव्यञ्जनाः तद्यथा शाक्यमुनेस्तथागतस्य पुरतो निग्र-

धर्म्मं शृण्वन्ति । अपि च तत्रापि श्र-

चकार गृध्रकूटादिशैलेषु धर्मदेशनाम् ॥

तस्मिन्निर्वाणमापन्ने तच्छिष्यैर्धर्मकोविदैः ।
प्रज्वालिता धर्ममया दीपास्तिमिरशान्तये ॥

कालक्रमेण ते दीपाः स्नेहसेकं विना पुनः ।
शैवानिलैस्तु निर्व्वाणा दक्षिणस्या दिशस्ततः ॥

तेषां शास्त्राणि विज्ञातुमुत्सुकाः शिक्षिताः सदा ।
तस्माद्बौद्धागमानाञ्च प्रचाराय सचेतसा ॥

श्रीशरच्चन्द्रदासेन सद्वैद्यकुलजेन वै ।
दुर्गमं तुहिनैस्तावत् हिमवत्शिखरस्थितम् ॥

तिब्बतं देशमासाद्य कृत्वा धर्मपुरोहितैः ।
मैत्रीं तेभ्यः समानीता बौद्धग्रन्थाश्च भूरिशः ॥

कलिकाताराजधान्यां सुधियां हितकाम्यया ।
समितिः स्थापिता तेन बौद्धशास्त्रप्रकाशिका ॥

वङ्गेशः कृपया तत्र वार्षिकं वित्तमादिशन् ।
लेभे कृतज्ञतापुण्यं सर्व्वेषां विदुषां भुवि ॥

सदृशा बहवस्तत्र विद्वांसः प्राज्ञवित्तमाः।
पाश्चात्यानाञ्च विदुषां सभेयं प्रीतिदायिनी॥
जाह्नव्याः पश्चिमे तीरे नवद्वीप-इतिश्रुते।
स्थाने कृतनिवासोऽस्मि शर्वविप्रकुलोद्भवः॥
श्रीशरच्चन्द्रशर्माहमधीत्य देवभारतीम्।
...वाल्याद्वङ्गभूमौ च वाराणस्याञ्च यत्नतः॥
अध्यापकानां कृपया तेषां चैव निदेशतः।
कलिकाताराजधान्यां तथैव पुण्यपत्तने॥
कृतोद्यमः परीक्षायां ततः पूर्णमनोरथः।
पुरस्कारेण सहितं प्रतिष्ठापत्रमाप्तवान्॥
विद्यालयेष्वथो कञ्चित् कालमध्याप्य यत्नतः।
पर्यटन् विविधान् देशान् जम्बूद्वीपे मनोरमे॥
...मनुरक्तोऽहं ग्रन्थसम्पादनेष्विह।
...माध्यमिकावृत्तिर्मया सम्पादिता पुनः॥
...स्य चरितं पवित्रं धर्मसंहितम्।
...पुण्डरीकाख्यं ग्रन्थं सम्पादयाम्यहम्॥
...रम लभ्येत प्रमादश्चेत् भ्रमोऽथ वा।
...यन्तु कृपया साञ्जलिः प्रार्थये बुधान्॥
...ब्देऽग्नियष्टौ चेन्द्रे *मासि फर्वरीसंज्ञके। *१८९९ अब्द.
...णापुण्डरीकाख्योग्रन्थोऽयं मुद्रितस्त्विह॥

...शास्त्री इत्युपनामकेन श्रीशरच्चन्द्रशर्मणा सम्पादितं
करुणापुण्डरीकम् नाम महायानसूत्रं
समाप्तम्॥

उपसंहृतिः ।



अत्युक्ते वैधकर्म्मादौ नराः पण्डितमानिनः ।
अन्वहं वासनामूढं वाञ्छन्ति त्रिदशालयम् ॥

निरागमः पशून् घ्नन्ति यागादौ धर्म्मलिप्सया ।
न विरज्यन्ति संसाराज्जरां मृत्युं विलोक्य च ॥

एवमकार्य्यं चरतां सन्तप्तानां निरन्तरम् ।
त्राणार्थमाविरासीत् स भगवान् पृथिवीतले ॥

शाक्यराजकुले जातः पुरे कपिलवस्तुनि ।
परिवव्राज लोकानां शिक्षार्थं यौवने स्वयम् ॥

सार्द्धद्वादशसाहस्रशिष्यैरन्वहमन्वितः ।
चकार गृध्रकूटादिशैलेषु धर्म्मदेशनाम् ॥

तस्मिन्निर्वाणमापन्ने तच्छिष्यैर्धर्म्मकोविदैः ।
प्रज्वालिता धर्म्ममया दीपास्तिमिरशान्तये ॥

कालक्रमेण ते दीपाः स्नेहसेकं विना पुनः ।
शैवानिलैस्तु निर्व्वाणा दक्षिणस्या दिशस्ततः ॥

तेषां शास्त्राणि विज्ञातुमुत्सुकाः शिक्षिताः सदा ।
तस्माद्बौद्धागमानाञ्च प्रचाराय सचेतसा ॥

श्रीशरच्चन्द्रदासेन सद्वैद्यकुलजेन वै ।
दुर्गमं तुहिनैस्तावत् हिमवत्शिखरस्थितम् ॥

तिब्बतं देशमासाद्य कृत्वा धर्म्मपुरोहितैः ।
मैत्रीं तेभ्यः समानीता बौद्धग्रन्थाश्च भूरिशः ॥

कलिकाताराजधान्यां सुधियां हितकाम्यया ।
समितिः स्थापिता तेन बौद्धशास्त्रप्रकाशिका ॥

वङ्गेशः कृपया तत्र वार्षिकं वित्तमादिशन् ।
लेभे कृतज्ञतापुण्यं सर्व्वेषां विदुषां भुवि ॥

सदस्या बहवस्तत्र विद्वांसः प्रज्ञविक्रमाः ।
पाश्चात्यानाञ्च विदुषां ममेयं प्रीतिदायिनी ॥
जाह्नव्याः पश्चिमे तीरे नवद्वीप-इतिश्रुते ।
स्थाने कृतनिवासोऽस्मि ग्रहविप्रकुलोद्भवः ॥
श्रीशरच्चन्द्रशर्म्माहमधीत्य देवभारतीम् ।
आबाल्याद्वङ्गभूमौ च वाराणस्याञ्च यत्नतः ॥
अध्यापकानां कृपया तेषां चैव निदेशतः ।
कलिकाताराजधान्यां तथैव पुण्यपत्तने ॥
कृतोद्यमः परीक्षायां ततः पूर्णमनोरथः ।
पुरस्कारेण महितं प्रतिष्ठापत्रमाप्तवान् ॥
विद्यालयेष्वथो कञ्चित् कालमध्याप्य यत्नतः ।
पर्य्यटन् विविधान् देशान् जम्बूद्वीपे मनोरमे ॥
इदानीमनुरुद्धोऽहं [illegible] ।
आदौ माध्यमिकवृत्तिर्मया सम्पादिता पुनः ॥
बोधिसत्त्वस्य चरितं पवित्रं धर्म्मवर्द्धनम् ।
करुणापुण्डरीकाख्यं ग्रन्थं सम्पादयाम्यहम् ॥
विद्वद्भिरत्र [illegible] प्रमादश्चेत् भ्रमोऽपि वा ।
संशोध्यताम् कृपया साञ्जलिः प्रार्थये बुधान् ।
[illegible] ।
करुणापुण्डरीकाख्योऽयं मुद्रितो[illegible] ।

इति श्रीमती [illegible] श्रीशरच्चन्द्रशर्म्मणा [illegible]
करुणापुण्डरीकं नाम महायानसूत्रं
समाप्तम् ।

मद्दृष्टा बहवस्तत्र विद्वांसः मन्त्रवित्तमाः ।
पाश्चात्यानाञ्च विदुषां सभेयं प्रीतिदायिनी ॥

जाह्नव्याः पश्चिमे तीरे नवद्वीप-इतिश्रुते ।
स्थाने कृतनिवासोऽस्मि याद्वविप्रकुलोद्भवः ॥

श्रीशरच्चन्द्रशर्माणमधीत्य देवभारतीम् ।
काश्यामाकृष्णमौ च वाराणस्याञ्च यत्नतः ॥

अध्यापकानां कृपया तेषां चैव निदेशतः ।
कलिकाताराजधान्यां तथैव पुण्यपत्तने ॥

कृतोद्यमः परीक्षायां ततः पूर्णमनोरथः ।
पुरस्कारेण सहितं प्रतिष्ठापत्रमाप्तवान् ॥

[illegible] कश्चित् [illegible] यत्नतः ।
पर्य्यटम् विविधान् देशान् जम्बूद्वीपे मनोरमे ॥

इदानीमप्युद्युक्तोऽहं ग्रन्थसम्पादने स्थितः ।
आदौ [illegible] पुनः ॥

[illegible] ।
करुणापुण्डरीकाख्यं [illegible] ॥

[illegible] ।
[illegible] ।

[illegible] ।
करुणापुण्डरीकस्य [illegible] ।

इति [illegible]
करुणापुण्डरीकम् [illegible]
समाप्तम् ॥